A

JUBILEE TRIBUTE

TO

Her Most Gracious Majesty

VICTORIA

THE QUEEN-EMPRESS

BY

KERALA VARMÂ VALIYA KOIL TAMPURÂN,

FELLOW OF THE MADRAS UNIVERSITY,

CONSORT OF HER HIGHNESS

THE SENIOR RÂNÎ OF TRAVANCORE,

MEMBER OF THE IMPERIAL ORDER OF

THE CROWN OF INDIA.

BOMBAY:

PRINTED AT THE "NIRNAYA-SÂGARA" PRESS.

1887.

Digitized by Google

~~IV. 5736~~
Ind n 5852



Wallis fund.

Digitized by Google

PREFACE.

The author of this humble production does not presume to offer it to the Sanskrit-reading public as a poem which can in any way attract their attention. As he was reading Mr. Barnett's "Life of Her Majesty Queen Victoria," (to which excellent work he is indebted for the facts alluded to in the notes,) it occurred to him that the main features of so noble a life, if embodied in Sanskrit stanzas of simple diction, might exert a beneficial influence on the minds of the girls of this Coast who generally study Sanskrit in their early years. His object, therefore, is not to excite admiration, but simply to serve the above purpose. He has purposely avoided flourishes of rhetoric as well as sentimental exaggerations which characterize Sanskrit literature as a rule. At the same time, it will be seen that he has not discarded a rhetorical embellishment when it naturally occurs.

TRIVANDRUM,
20th June 1887.

K. V.

Digitized by Google

Digitized by Google

अथ

श्रीव्हिक्टोरियाचरितसंग्रहः ।

श्रीमत्यशेषजगतीतिलकायिते या
देशे[1] विभाति यशसा विशदीकृताशा ।
विख्यातनीतिभृतभारत[2]भूतला श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ १ ॥

या शैशवे विधिवशात्पितृ[3]विप्रयुक्ता
भूयस्तरप्रणयभारमरक्षि मात्रा ।
विश्वातिशायिगुणगौरवविश्रुता श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ २ ॥

देवो विपत्[4]समुदयात्स दयापयोधिः
प्राणप्रणाशभयदादपि यामगोपीत् ।
विक्रान्तिशान्तिधृतिनीतिकृपानिधिः श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ३ ॥

तत्तादृशोन्नतपदाधिगमं कुमारी[5]
या भाविनं न चिरमाकलयांचकार ।
वित्ता विशिष्टतरसद्गुणसंचयैः श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ४ ॥

---

1. England. 2. India. 3. Her Majesty's father, the Duke of Kent, died when she was eight months old. 4. A youth fired at some small birds so near to the residence of Her Majesty that the charge broke the windows, and some of the shot passed quite close to her head. On another occasion She was nearly killed by the upsetting of her pony carriage. 5. It was not until the spring of 1830 that Her Majesty became aware of her nearness to the British throne.

Digitized by Google

साधारणप्रभुकुलेऽपि[1] ययावतीर्य
साम्राज्यसाधुगुणमण्डलया व्यलासि ।
विद्याविनोदरसिका विदुषां मता श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ५ ॥

मात्रातिमात्रमखिलेश्वरभक्तिमत्या[2]
सत्यादरो व्यरचि शैशव एव यस्याः ।
विश्वासिनी विमलवैदिकवर्त्मसु श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ६ ॥

साहित्यसारसरसा तरसाभवद्या[3]
विद्यार्थिनी प्रसृमरप्रतिभाविलासा ।
विद्वन्मनःकुवलयामृतदीधितिः श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ७ ॥

संगीतशास्त्रसरणावपि यातिवेल-[4]
मङ्गीचकार चतुरत्वमयत्नमेव ।
विज्ञानमीप्सुरनिशं व्यवसायिनी श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ८ ॥

शिल्पेषु चित्ररचनादिषु[5] नैकभेदे-
ष्वल्पेतरामलभताशु विदग्धतां या ।
विस्मापयन्त्यपि विचक्षणशिल्पिनः श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ९ ॥

---

1. The Duke of Kent, fourth son of George III. 2. The Duchess of Kent who was an exemplary Christian, brought up her child under her own eye. 3. Under the instruction of Dr. Davys and the Barones Lehzen continued for about six years, Her Majesty made considerable progress in her studies and could lay claim to great accomplishments. 4. Under her masters the famous Lablache and W. J. B. Sale, Her Majesty attained great proficiency in music. 5. Her Majesty made considerable progress in drawing, needlework, etching &c.

Digitized by Google

[1]आत्माभिमानमुचितं दधतापि यस्या
नो चेतसाकलि कदापि परावहेला ।
विध्वस्तदोषकणिका विपुलाशया श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ १० ॥

[2]अष्टादशे वयसि पुष्टगुणाभिरामा
साम्राज्यमेत्य सुजनानधिनोद्दृशं या ।
विश्वंभराभरणनैपुणशालिनी श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ११ ॥

एकाकिनी पुनरनाकुलमेव धीरा
या दुर्भरां निजधुरां बिभरांबभूव ।
विश्वस्तमन्त्रि[3]वचनानुविधायिनी श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ १२ ॥

आत्मानुरूपर्म[4]भिरूपमथाग्रहीद्या
प्रेयांसमात्मसुखदुःखसमांशभाजम् ।
विश्वस्य शश्वदि[6]ह विश्रममीयुषी श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ १३ ॥

[7]भर्तारमुच्छ्रिततरेऽपि पदे स्थिता या
भक्त्यादरातिशयभागनुवर्तते स्म ।

---

1. With a due proportion of self-respect, Her Majesty combined a tender consideration for others. 2. Her Majesty was proclaimed Queen of Great Britain and Ireland on the 21st of June 1837 when she was eighteen years old. 3. Lord Melbourne, Prime Minister. 4. Learned and pleasing. 5. Prince Albert, son of the Duke of Saxe-Coburg-Gotha. 6. इह अस्मिन्प्रेयसि. 7. When the Archbishop of Canterbury enquired of Her Majesty if it were her wish that any alteration should be made in that portion of the Service which included the promise of 'obedience,' she replied that it was her wish to be married in all respects like any other woman, and that, though not as a *queen*, as a *woman* she was ready to promise all things contained in the Liturgy.

Digitized by Google

विज्ञेन तेन बहुधा विहितार्हणा श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ १४ ॥

अत्यादरादकृत कृत्यशतानि पत्या
नित्यान्यनन्यरुचिना सहितान्वहं या ।
विस्रम्भमप्रतिममत्र[1] वितन्वती श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ १५ ॥

प्रासूत या दुहितरं[2] प्रथमं प्रजाभिः
संप्रार्थ्यमानपुमपत्यसमुद्भवापि ।
विश्वेश्वरस्य कृपया विगतामया[3] श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ १६ ॥

स्त्रीजन्मना[4] किल मनाग्विमनायमान-
माह स्म या पतिमथात्मजमाप्स्यसीति ।
विज्ञानिनी वितथवाङ् न कथंचन श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ १७ ॥

यां सूतिकागृहगतां[5] विगतान्यचिन्तः
प्रेम्णानिशं परिचचार पतिर्हितज्ञः ।
विस्मारितार्तिरमुना विविधोक्तिभिः श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ १८ ॥

---

1. अत्र अस्मिन्पत्यौ. 2. Victoria Adelaide Mary Luise, the Princess Royal, was born on the 21st of November, 1840. 3. Her Majesty speedily recovered from her accouchement. 4. Prince Albert expressed a fear that the people might be disappointed, where-upon Her Majesty reassured him by saying, 'Never mind; the next shall be a boy.' And so it proved to be. 5. The Prince was content to sit by Her Majesty in a darkened room, to read to her, and write for her. No one but himself ever lifted her from her bed to her sofa, and he always helped to wheel her on her bed or sofa into the next room.

Digitized by Google

[1]शीने कदापि तुहिने विहरन्नरक्षि
मङ्क्वचन्द्रवीभवति मङ्क्षु यया प्रियोऽस्मिन् ।
विश्वाभिनन्दितविशङ्कटधीरता श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ १९ ॥

[2]र्यां सप्रियां युवजनो विषयाधिवासी
दृष्टान्तयन्नजनि सच्चरितैकनिष्ठः ।
विख्यातधर्मरतिरेकपतिव्रता श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ २० ॥

आनन्दयन्नखिललोकमनांसि यस्याः
श्रीमानजायत [3]सुतो धृतयौवराज्यः ।
विस्तारितस्वपतिभाग्यसमुन्नतिः श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ २१ ॥

[4]कान्तेन संततमुपान्तगतेन शान्त-
स्वान्तेन याजनि लघूभवदामनस्या ।
विष्वग्विसृत्वरयशोभरशीभरा श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ २२ ॥

यस्याः प्रमोदविवशेन महाजनानां
वृन्देन नन्दनजनुर्भृशभभ्यनन्दि ।

---

1. The Prince was skating in Buckingham Palace Gardens when the ice suddenly gave way, and he was immersed in deep water. Her Majesty was the only person who had sufficient presence of mind to render him any material assistance. 2. Her Majesty and her husband entered into the pleasures of the people, and their influence upon the stage was a healthful one. The theatres to which they went were purified by their presence; and evils which had been the growth of years disappeared. 3. Albert Edward, Prince of Wales, was born on the 9th November, 1841. 4. Prince Albert's care for Her Majesty was like that of a mother; nor could there be a kinder, wiser, more judicious nurse.

Digitized by Google

विश्राणितामितवसुर्वसुधेश्वरी श्री-[1]
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ २३ ॥
कारागृहे नियमितान्करुणापयोधि-[2]
र्यामोचयत्तनयजन्मनि सौम्यशीलान् ।
विख्यापितस्वसुततत्तदधिक्रिया श्री-[3]
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ २४ ॥
घोरे रणे शठतरारिविरुध्यमानै-[4]
र्यत्सैनिकैः प्रतिदिशं जयिभिर्बभूवे ।
वित्रासितारिनिकरा विजयोज्ज्वला श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ २५ ॥
सौजन्यसिन्धुमपि यामसकृज्जिघांसु-[5]
र्दुष्टस्य दिष्टबलतो विफलोद्यमोऽभूत् ।
विश्वैर्जनैर्विपुलमोदमथार्हिता श्री-[6]
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ २६ ॥
अप्याततायिनि खलेऽत्र विशृङ्खलोऽभू-
द्यस्याः प्रभूततरभूतदयाविलासः ।

---

1. At the birth of the Princess Royal, the previous wet-nurse received £ 500; but on the birth of the Prince of Wales all the gratuities were doubled. 2. Her Majesty was pleased to notify to the Home Secretary that those convicts who had behaved well should have their punishment commuted; and that those deserving this clemency on board the various hulks should have their liberty at once granted them. 3. When the baby Prince was a month old Her Majesty issued a patent creating 'our most dear son' Prince of Wales, Earl of Chester &c. &c. 4. In 1842 the English were at war with Afghanistan and China, and the British arms ultimately triumphed. 5. John Francis and William Bean, two miscreants, made unsuccessful attempts to assassinate Her Majesty by shooting within a few weeks of each other. 6. Congratulatory addresses were voted by both Houses of Parliament to Her Majesty on her escape from assassination; and numerous similar addresses were subsequently forwarded by corporate bodies throughout the kingdom.

Digitized by Google

विद्वन्मतैतदसुनाशनिषेधिनी श्री-[1]
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ २७ ॥
स्वप्रेयसा सह पुरोत्तममौत्तराहं[2]
या प्राप्य दृश्यमखिलं कुतुकादपश्यत् ।
विस्मेरतां विदधती स्वगुणैर्नृणां श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ २८ ॥
गूढं[3] प्रियेण सह कंचिदकिंचनस्य
गत्वा कुटीरमकरोत्तदनुग्रहं या ।
विस्रब्धसंचरणविश्रुतकौतुका श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ २९ ॥
या प्रेयसीमजनयत्तनयामपत्या-[4]
न्यासाद्य सप्त बत कालवशं प्रयाताम् ।
विश्वंभरेऽर्पितमतिः सुखदुःखयोः श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ३० ॥
या बान्धवान्क्षितिपतीनतिथीनजस्र-[5]
मानन्दसान्द्रहृदयानकृतातिथेयी ।

---

1. Jonn Francis was sentenced to death by Chief Justice Tindall; but Her Majesty directed a reprieve of the sentence, which was commuted to transportation for life. 2. Her Majesty paid her first visit to Edinburgh in 1842 and inspected everything of historical interest. 3. While staying at Walmer, Her Majesty and her consort took a walk, completely unattended, to the village of Kingsdown, calling on the way at the cottage of an old fisherman and chatting for a short time with his daughter. 4. Princess Alice Maude Mary was born on the 25th April 1843. She grew up to be an especial favorite with the English people, gave birth to seven children and died in 1878. 5. The King and Queen of the Belgians, as also several other royal guests and relatives, were present on the occasion of the wedding of the Princess Augusta Caroline, eldest daughter of the Duke of Cambridge, at Buckingham Palace, and were overjoyed by Her Majesty's hospitality.

Digitized by Google

विज्ञातुमन्यहृदयान्यतिकोविदा श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ३१ ॥
पारेपयोधि निजबन्धुवसुंधरेश-[1]
संभावनामधिजगाम सकामुका या ।
विभ्राजिताखिलदिशा यशसा भृशं श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ३२ ॥
श्रुत्वा शुचा विवशिता श्वशुरं परासु-[2]
माश्वासयत्पतिमनन्यगतिं सती या ।
विद्धे शुचेह विहिताधिकसौहृदा श्री-[3]
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ३३ ॥
या संनिधिं गतवतः सुजनस्य चेतः[4]
स्फीतप्रमोदमतनोदतुलैर्गुणौघैः ।
विश्राणनाद्युचितकृत्यविचक्षणा श्री-[5]
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ३४ ॥
अन्यं सुतं पुनरसूत पितृप्रणाश-[6]
क्लेशं स्वभर्तुरपहर्तुमिवाचिराद्या ।
विश्वेशितर्यविरतं विधृताशया श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ३५ ॥

---

1. In September 1843, Her Majesty and Prince Albert went to France and paid a visit to the King and Queen of the French who gave them a splendid welcome. 2. Prince Albert's father, the Duke of Saxe-Coburg–Gotha, died in January 1844, at the age of sixty years. The Prinee found deep solace in Her Majesty's affection. 3. शुचा पितृनाशदुःखेन विद्धे ताडिते· अभिभूत इत्यर्थः· इह पत्यौ कृतपूर्वाधिक-प्रणया· 4. Mendelssohn, the celebrated composer, and General Tom Thumb were quite delighted with their visit to Her Majesty. 5. She gave the former a beautiful ring on which was engraved—"V. R. 1842." The *souvenir* which she gave to the latter was very superb, being of mother-of-pearl set with rubies, and bearing a crown and the royal initials "V. R." 6. Prince Alfred Ernest Albert, Duke of Edinburgh, was born on the 6th August, 1844.

Digitized by Google

संज्ञापितं सपदि वैद्युतलोहतन्त्र्या[1]
यस्या द्वितीयतनयस्य जनुर्जगत्याम् ।
विज्ञानवित्तविबुधैधितविश्रुतिः श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ३६ ॥

देशे पुरा[2]द्बहिरदूरतरे विविक्त-
वासादरेण निरमापयदालयं या ।
वित्तव्ययं विपुलमत्र वितन्वती श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ३७ ॥

मित्रा[3]वनीभृदनुमोदितया कमित्रा
सत्रा ययास्य विदधेऽभिजनाय यात्रा ।
विस्तीर्णपोतवरतीर्णमहार्णवा श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ३८ ॥

आलो[4]कयद्धयितबाल्यविहारभूमी-
स्तत्रातिमात्रकुतुकोत्तरलीकृता या ।
विस्पष्टमिष्टपतितुष्टिदचेष्टिता श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ३९ ॥

---

1. Her Majesty's happy delivery was announced in the "Times" in precisely forty minutes after it had taken place at Windsor Castle; and as this was the first occasion on which the electric telegraph had been so used, the rapid publication of the news was considered very surprising. 2. Her Majesty got a new mansion built at Osborne which was not far from London, but had all the advantages of a country house. 3. Her Majesty set out with the Prince Consort on her first visit to Germany, and was met at Malines by the King and Queen of the Belgians who escorted them through their dominions to Verviers and Aix-la-Chapelle, where the King of Prussia was in readiness to receive them. 4. One can imagine the delight with which Her Majesty viewed the various places dear to the Prince's youth which he pointed out to his wife.

Digitized by Google

[1]तज्जन्मसद्मनि समं सरसेन तेन
या पञ्चषाणि दिवसान्यवसत्प्रसन्ना ।
विस्मृत्य गौरवमितस्तत ईयुषी श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ४० ॥
[2]तत्रैव [3]तज्जनिदिनोत्सवमङ्गलानि
निर्वर्त्य या पतिमतीव धिनोति यावत् ।
विश्वोत्तरां विदधती विदुषां मुदं श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ४१ ॥
प्रत्यागता निजगृहान्प्रतिहार एव
प्रीत्या व्यलोकयदपत्यचतुष्टयं या ।
विन्दन्त्यदोविद्धतिभिर्विपुलां मुदं श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ४२ ॥
सौभाग्यभाग्यजलधिर्जनयांबभूव
भूयोऽपि या धृतनया [4]तनयां तृतीयाम् ।
विन्नादरा विविधया धवसेवया श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ४३ ॥
[5]आयस्तधीरतितरामजनि प्रधाने-
ष्वाप्तेषु विच्युतपदेषु तदा तदा या ।

---

1. Her Majesty and the Prince took up their residence at the palace of Rosenan, occupying the very room in which the Prince was born. Five or six days of pleasure now followed, husband and wife going about together everywhere. 2. Prince Albert's Birth-day was celebrated there, and Her Majesty wrote thus: 'To celebrate this dear day in my beloved husband's country and birth-place is more than I ever hoped for.' 3. When Her Majesty and the Prince reached their home at Osborne, there stood the four children looking like roses, so well and so fat. 4. Her Majesty's third daughter, Princess Helena Augusta Victoria, was born on the 25th of May 1846. 5. The Government was defeated on its Irish Coercion Bill; and Her Majesty felt the parting with Peel and Lord Aberdeen most keenly. But she had still one person on whose counsel she could rely, and one far dearer to her than her ministers.

Digitized by Google

विन्यस्तदुर्भरधुरा विदुषि प्रिये श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ४४ ॥

हेतोः[1] कुतश्चन गते दयितेऽपरत्र
द्वित्राण्यहान्यमनुताब्दसमान्यहो या ।
विप्रोषितं तमनुचिन्त्य विषण्णधीः श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ४५ ॥

या[2] बन्धुवर्गसहिता श्रितयानपात्रा
यादस्पतौ कतिपयानि दिनान्यनैषीत् ।
विख्यातियुक्तविविधस्थलवीक्षिणी श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ४६ ॥

यस्याः[3] प्रियाय विदुषां परिषद्वरिष्ठा-
मध्यक्षतामदित सर्वकलालयस्य ।
विद्याचणेऽत्र विदुषी विलसद्रसा श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ४७ ॥

भूयोऽपि[4] भूधरसरोवरभूरिभासं
या संददर्श निजनीवृदुदक्प्रदेशम् ।
विच्छिन्नशङ्कविहरद्रमणान्विता श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ४८ ॥

---

1. While Prince Albert was gone to Liverpool to open the Albert Dock there, Her Majesty wrote to Baron Stockmar: 'I feel very lonely without my dear master. It will always cause a terrible pang for me to be separated from him even for two days.' 2. On the 18th of August, 1846, Her Majesty, the Prince Consort, and several members of the Royal Family, embarked on board the *Victoria* and *Albert* for a sail down the Channel, and visited Weymouth, Babbicombe, Mount Edgcumbe and several other interesting places. 3. On the 28th of February, 1847, Prince Albert was elected Chancellor of the University of Cambridge. 4. In August 1847, Her Majesty and the Prince again visited Scotland.

Digitized by Google

[1]राज्यच्युतो हतविधेर्बत चक्रवर्ती
यन्मादिरेऽभयमविन्दत कांदिशीकः ।
विभ्रष्टमित्रहितसूक्तिविशारदा श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ४९ ॥
[2]देशान्तरेषु बहुधा क्षुभितेष्वबाध-
राज्याथ या दुहितृरत्नमसूत तुर्यम् ।
विश्वैकनाथदृढविश्वसिताशया श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ५० ॥
[3]जातात्मजाथ मृतबन्धुरबोधि साधु
या संसृतिप्रवहणं जनिमृत्युचक्रम् ।
विक्षेपविभ्रमविवर्जितशेमुषी श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ५१ ॥
[4]क्षोभोद्यताः कतिचन प्रकृतीरतृप्ताः
शान्तिं निनाय निजनीतिभिरञ्जसा या ।

---

1. The policy of Louis Philippe had long rendered the King very unpopular. The public discontent now found vent in revolution, and the dynasty was swept away, and a republic proclaimed. The proud Monarch succeeded in escaping to England and paid a private visit to Her Majesty, by whom he was received in the most affectionate and hospitable manner. 2. The effects of the revolutionary spirit were felt in other countries—Italy, Spain, Prussia, and Austria. In the midst of the general solicitude for the peace of England during this time of convulsion, Her Majesty was delivered of her fourth daughter, Princess Louise Caroline Alberta, on the 18th March, 1848. 3. 'Life and death are ever close together.' Only a few days after the birth of the Princess Louise, came the record of the death of the Princess Sophia, the youngest surviving daughter and twelfth child of George III. and Queen Charlotte. 4. Chartist disturbances were expected at this time, and there was considerable discontent over the income-tax and the increased grants for the army and navy. On the 13th of March a Chartist meeting was held on Kensington Common. The military and other authorities of Her Majesty's Government acted with promptitude, and the leaders of the movement having been arrested, the agitation subsided.

Digitized by Google

विस्तारयन्त्यविरतं जनभावुकं श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ९२ ॥

कौतूहलादकृत या सहपत्यपत्य-[1]
भृत्या पुनश्च विषयोत्तरदेशयात्राम् ।
विद्योतमानपुरवर्यविलोकिनी श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ९३ ॥

प्रत्यायती[2] पथि पयोधिविपन्ननौका-
न्कांश्चिज्जनानवितुमैहत यातिवेलम् ।
विश्वेडितातुलदया विमलाशया श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ९४ ॥

पञ्चापगापरिगतो[3] विषयो ययार्या-
वर्ते विजित्य विदधे स्ववशे विशालः ।
विष्फूर्जदूर्जितचमूविजिताहिता श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ९५ ॥

---

1. Her Majesty and the Prince Consort, accompanied by the Prince of Wales, the Princess Royal, Prince Alfred, and suite, again set out for Scotland on the 5th of September 1848, their destination on this occasion being Balmoral Castle. 2. On their way back, the royal party witnessed a sad accident in the Channel. Her Majesty's yacht passed the frigate *Grampus* which had just returned from her station in the Pacific. The day was misty and stormy, but five women, relatives of the men on board the *Grampus*, had gone out in a small boat to meet royal party, when a sudden squall swamped the boat which capsized. Prince Albert was the first person to realize what had occurred. Her Majesty was quite overcome. The royal yacht was stopped, and one of its boats lowered, which picked up three women, two of whom were unfortunately dead. 3. A formidable rebellion had broken out in the Punjab, and Sir Charles Napier was sent out to India; but before his arrival, Lord Gough had encountered the combined forces of the enemy at Gujerat, and totally defeated them. The rebellion was suppressed and the Punjab was annexed to Her Majesty's British possessions in India.

Digitized by Google

[1]यां स्वप्रजावननिरन्तरजागरूकां
हा हन्त हन्तुमुदयुङ्क पुनश्च कश्चित् ।
विष्णोः कृपाविलसिताङ्घ्रिपदुज्झिता श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ९६ ॥

[2]पाश्चात्यमात्मविषयान्तरमन्तरीपं
या सप्रिया चिरदिदृक्षितमीक्षते स्म ।
विश्वैरपीड्यविनयैरभिनन्दिता श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ९७ ॥

[3]तद्देशवासितरुणीजनरूपधेय-
माधुर्यमाधित मुदं हृदये यदीये ।
विज्ञा विशेषगुणवित्तिविशारदा श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ९८ ॥

[4]यां विश्रमाय पुनरुत्तरदेशमेत्य
पत्यादिभिः सह चिरं विजहार कामम् ।
विस्रस्तयन्त्रणविनोदधृतादरा श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ९९ ॥

[5]पुत्रं तृतीयमधुना पृतनाधिनाथ-
स्थानं दधानमिह या जनयांचकार ।

---

1. While Her Majesty was driving out in an open carriage with three of her children, one William Hamilton, who stood within the railings of the Green Park, discharged a pistol in the direction of the Queen. He was sentenced to seven year's transportation. 2. Her Majesty's long-wished-for visit to Ireland was paid in August 1849. 3. Her Majesty was much struck by the beauty of the Irish women. 4. Her Majesty went to Scotland and stayed in her Highland home for about six weeks, enjoying, with her husband and children, real privacy. 5. Her Majesty's third Son, Prince Arthur William Patrick Albert, Duke of Connaught, now Commander-in-Chief of Bombay, was born on the 1st of May, 1850, the eighty-first Birth-day of the Duke of Wellington.

Digitized by Google

विन्दन्त्यमुष्य जनुषि प्रमदं भृशं श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ६० ॥
तास्ताः प्रजासमुदयाभ्युदयोपयुक्ताः
प्रावर्तयत्स्वविषयेषु परिष्कृतीर्या ।
विन्दुव्रजं[1] विदधती बहुमानितं श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ६१ ॥
नानादिगन्तरगताद्भुतवस्तुजात-[2]
मानाय्य या स्वनगरे प्रकटीचकार ।
विद्वन्मतस्वदयितश्रमतोषिता श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ६२ ॥
ऐक्षिष्ट या महममुं स्वयमेत्य शालां
मत्प्राणवल्लभनिरूढ[3] इति प्रहृष्टा ।
विस्मेरपौरविकचेक्षणवीक्षिता श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ६३ ॥
भूयोनृणां निधननिर्धनतानिदानी-[4]
भूता निशम्य विपदश्रिखिदे ययोच्चैः ।
विश्वप्रतीतपरदुःखसदुःखता श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ६४ ॥

---

1. विन्दूनां विदुषां व्रजम् । 'विन्दुरिच्छुः' (P. III. 2. 169.) 2. The greatest event of 1851 was the opening of the Great Exhibition in Hyde Park. 3. अयं मह उत्सवः i. e. the Exhibition. मत्प्राणवल्लभेन निरूढः । निरुपसृष्टाद्धृतेः कर्मणि क्तः । इतिहेतोः प्रहृष्टा । 4. The year 1852 was one of appalling disasters. Early in January the splendid Mail steam-ship *Amazon* was destroyed by fire, and 140 persons perished. Another fearful catastrophe occurred in April, when Her Majesty's steam troop-ship *Birkenhead* went down near the Cape of Good Hope, and about 436 lives were lost. A third catastrophe was the bursting of the Bilberry reservoir, by which nearly 100 persons perished and more than 7,000 persons were instantly rendered destitute; the total damage was estimated at £ 600,000. Her Majesty was greatly moved on learning of these dire calamities.

Digitized by Google

शोकान्धतां बहुमतस्थविरैकवीर-[1]
सेनाधिपप्रभुपरासुतयानशे या ।
विख्यापितैतदसमानगुणोत्करा श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ६५ ॥

स्फीतप्रतापचकितो नु शशाम शीघ्रं[2]
यस्या गृहं महदहो दहनो दिधक्षन् ।
विद्रावितापदनिशं शुभकर्मभिः श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ६६ ॥

तुर्योऽजनिष्ट सुकुमारतरः कुमारो[3]
यस्याः सनन्दनयुगोऽद्य बतः प्रमीतः ।
विज्ञानवैभवविधूतमनोव्यथा श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ६७ ॥

सेनामृषामृधमवैक्षत सांयुगीन-[4]
वेषोज्ज्वला समधिरूढहयोत्तमा या ।

---

1 On the 16th September, 1852, Her Majesty received the intelligence of the death of the greatest of her subjects. The illustrious Wellington, 'the great Duke,' had passed away at Walmer, after a few hour's illness, and with no suffering, at the patriarchal age of eighty-three. Keenly did Her Majesty feel this great loss, and she spoke of him as 'England's, or rather Britain's, pride, her glory, her hero, the greatest man she had ever produced.' 2. On the 19th of March 1853, a disastrous fire broke out in Windsor Castle. Fortunately the flames were subdued and the injury was confined to the ceilings of the dining-room in the Prince of Wales' Tower. Her Majesty's principal treasures were removed in safety on the announcement of the outbreak. 3. Her Majesty's fourth son, Prince Leopold George Duncan Albert, Duke of Albany, was born on the 7th April, 1853. He has two children, and died in 1884. 4. On the 21st of June there was a splendid military spectacle at Chobham, when a sham fight and a series of military manœuvres were carried out before Her Majesty, Prince Albert &c. Her Majesty excited great admiration as she rode down the lines, dressed in a half-military riding-habit, and mounted on a splendid ebony steed.

Digitized by Google

विद्वेषिभीषणचमूशतशालिनी श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ६८ ॥

[1]सांक्रामिकःसकमनां सहनन्दनां यां
विस्फोटरुग्व्यतिकरो व्यथयांचकार ।
विद्वद्विषग्वरविदूरितरुग्द्रुतं श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ६९ ॥

[2]या दूयते स्म दयितं निशमय्य लोकै-
र्मिथ्याभिशस्तमविमृष्टतदीयकृत्यैः ।
विख्यापयन्त्यमुमथात्मसमस्थितिं श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ७० ॥

[3]राहोस्तुषारमहसीव मृषापवादा-
न्मुक्ते प्रिये मुदमधत्त कलानिधौ या ।
विभ्रान्तिहीनसचिवप्रवराद्दता श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ७१ ॥

---

1. Early in July, various members of Her Majesty's family were attacked with measles. The Prince of Wales was the first sufferer, but he was quickly convalescent; Prince Albert suffered more virulently; the Princess Royal and the Princess Alice took the infection mildly, and Her Majesty also suffered from a very mild attack of the disorder. All happily recovered without any serious consequences, under judicious treatment. 2. There was about this time loud talk about Court prejudice and intrigue, and it was openly said that Prince Albert was acting as a hostile influence 'behind the Throne' against the wishes of the people. The feeling was now as strong against the Prince as it had been in his favor a few years before. Her Majesty wrote to Lord Aberdeen: 'In attacking the Prince, who is one and the same with the Queen herself, the Throne is assailed.' 3. In January 1854, when Parliament met, the calumnies against the Prince were completely refuted by Lord Aberdeen in the House of Lords, and by Lord John Russell in the House of Commons. Her Majesty heartily rejoiced when the clouds lifted.

Digitized by Google

[1]प्राच्यामथ प्रतिभयप्रधनप्रसङ्गे
या प्राहिणोत्स्वपृतनां प्रथितप्रतापाम् ।
विघ्नं विना सपदि तद्विजयार्थिनी श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ७२ ॥

[2]चेखिद्यते स्म समराङ्गणसाङ्गभङ्ग-
प्रत्यागतानवधियोधविलोकिनी या ।
विक्रान्तसङ्कटसभाजनलम्पटा श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ७३ ॥

[3]चित्रीयते स्म निशमय्य सपद्यपासुं
धात्रीशमुग्रतरतद्रणकारणं या ।
[4]विश्वस्तमित्रनृपसत्कृतिमोदिनी श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ७४ ॥

[5]आत्मीयसैन्यविजयस्य नवोपयुक्ते
योदग्दिगोकसि वसन्त्यशृणोदुदन्तम् ।

---

1. War was now declared against Russia, and Her Majesty was much touched over the farewell to her gallant troops setting out for the East. 2. Her Majesty accompanied by Prince Albert, visited the wounded soldiers at Chatham. She distributed medals to some of the heroes of the war in the East. 3. Her Majesty, as well as the whole Europe, was startled by the sudden news of the death of Emperor Nicholas, an event due as much to the failure of his plans in the Crimea as to the chilling influences of the 'Generals, January and February.' 4. In April the Emperor and Empress of the French arrived at Windsor Castle on a visit to Her Majesty, and in August she went over to France on a visit to them. विश्वस्तमित्रनृपकर्मकसत्कृत्या तत्कर्तृकसत्कृत्या च मोदिनीति कर्मषष्ठ्या कर्तृषष्ठ्या च समासाश्रयणादत्रोदाहृतावुभावपि वृत्तान्तौ सूचितौ। 5. The new house at Balmoral was sufficiently advanced for occupation, and as Her Majesty entered the hall, an old shoe was thrown after her for good luck, which indeed resulted in the happy news of Sebastopol being in the hands of the Allies reaching her while staying there.

Digitized by Google

[1]विख्याप्यमानविजया विविधोत्सवैः श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ७५ ॥

[2]या पञ्चमीं प्रियतमां तनयामसूत
प्रेमप्ररोहमिव मूर्तमपत्यमन्त्यम् ।
विश्वंभरे विहितविश्वभरार्पणा श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ७६ ॥

[3]या भारतेऽत्र निशमय्य चमूसमूह-
क्षोभप्रवृत्तिमतिमात्रमभूद्विषण्णा ।
विक्राथितस्वजनसंहतिशोचिनी श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ७७ ॥

[4]दण्डं प्रचण्डमुपयुज्य धुतापदो या
जग्राह भारतभुवः स्वयमेव भारम् ।
विष्वक्प्रवर्तितसुनीतिरकण्टका श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ७८ ॥

[5]यस्याः प्रकामसुषमा प्रथमा कुमारी
प्रापानुरूपरमणं रमणीयशीला ।
विश्लेषकातरसुतापरिरम्भिणी श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ७९ ॥

---

1. Guns were fired and bonfires lit, and there was a great scene of excitement in this distant corner of the Highlands. 2. Her Majesty's fifth daughter and last and ninth child, Princess Beatrice Mary Victoria Feodore, was born on the 14th of April 1857. 3. The terrible news of the mutiny in India and the massacre at Cawnpore reached Her Majesty and grieved her very much. 4. Severe measures were adopted to avenge the native cruelties, and the mutiny was happily suppressed. In the succeeding year Her Majesty assumed the direct control and Government of India. 5. On the 24th of January, 1858, the Princess Royal was married to Prince Frederick William of Prussia, now the Crown Prince of Germany.

Digitized by Google

[1]तामीक्षितुं श्वशुरदेशगतामथान्त-
र्वत्नीं प्रियेण सह या प्रणयादयासीत् ।
विस्त्रावितास्त्रुरदसीयवियोगतः श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ८० ॥

[2]दौहित्रजन्ममुदिताद्दतदेशयात्रा
श्वश्रूमृतेरजनि या पुनरात्तशोका ।
विष्णोर्विचित्रतरविभ्रमवीक्षिणी श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ८१ ॥

[3]भर्तुर्भयंकरविपत्तिविमुक्तिहृष्टा
[4]भूयोऽभवद्बलवदामयबाधिता या ।
[5]विश्रम्य वीतगदतां द्रुतमीयुषी श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ८२ ॥

---

1. Her Majesty and the Prince Consort crossed over to Antwerp in the royal yacht and proceeded to pay a visit to their daughter in her German home. When the time came for parting, it was more keenly felt by the Queen than had been the original separation; for, she wrote: 'All would be comparatively easy were it not for the one thought, that I cannot be with her at that very critical moment when every other mother goes to her child.' 2. The first grand-child of the Queen was born at Berlin on the 27th of January 1859. Her Majesty paid a visit to the ancestral States of the Saxe-Coburg-Gothas. One sorrowful event occurred, which threw a gloom over the visitors : this was the death of the Dowager Duchess of Coburg, the mother of the Prince Consort. 3. The Prince Consort had a narrow escape from a very serious carriage accident during Her Majesty's stay at Coburg. In gratitude for the Prince's preservation, she founded a charity to provide for young men and young women of good character, suitable provision on their marriage and settlement in life. 4. Her Majesty had an attack of a very severe cold with sore throat. She had never been so seriously unwell since her childhood. 5. During her enforced inactivity, Lady Churchill read to her *The mill on the Floss*, and she happily made a good and quick recovery.

Digitized by Google

[1]माता दशां दशमिनी दशमीं जगाम
यस्याः सुदुःसहशुचः सविधे रुदत्याः ।
विध्वस्तधैर्यमवलम्बिततत्करा श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ८३ ॥
विश्वस्तमाशु दयितं विनिपात्य यस्या
[2]विश्वस्ततां व्यधित हन्त विधिर्नृशंसः ।
विस्तारितार्तपरिदेवितविह्वला श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ८४ ॥
इन्धे यदीयहृदयाब्धितलेऽधुनापि
प्रेयोवियोगवडवाग्निरशान्तशक्तिः ।
[3]विश्वानुशोचिततथाविधदुर्दशा श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ८५ ॥
[4]प्राङ् निश्चिताय दयिताय सुतां द्वितीयां
प्रायच्छदप्रकटितोपयमोत्सवा या ।
विभ्राजिता विधवतोचितवाससा श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ८६ ॥
[5]रूपोत्तरां नृपसुतामथ पर्यणैषी-
द्यस्या युवाविनृपस्तनयो मनीषी ।

---

1. The Duchess of Kent in her seventy-sixth year was all of a sudden seized with a shivering fit. Her Majesty remained by the side of her mother holding the beloved hand; and when the Duchess breathed her last, the Queen, convulsed with sobs, fell on the hand and covered it with kisses. 2. विश्वस्तता वैधव्यम् । 'विश्वस्ता विधवे समे' इत्यमरः । Stern fate made Her Majesty a widow at forty-two. 3. There was not a house in the land that was not saddened by the news. All diversities of social rank and feeling were united in one spontaneous manifestation of sympathy with the widowed Queen and the bereaved family. 4. The marriage of Princess Alice to Prince Louis of Hesse—which had been delayed by the Prince Consort's death—took place at Osborne on the 1st of July, 1862, the ceremony being of a private character. Her Majesty attended in deep mourning habit. 5. The Prince of Wales married Princess Alexandria of Denmark on the 10th of March, 1863.

Digitized by Google

विश्वासभक्तिभृतया स्नुषयार्हिता श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ८७ ॥

ध्वान्तेऽध्वनि स्खलितचक्ररथा कदापि[1]
याधः पपात दुहितृद्वितयेन सार्धम् ।
विद्धानना परमृते विपदन्तरं श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ८८ ॥

प्रत्यक्षमेत्य[2] सदसि प्रथमानभक्ति-
र्या प्रेयसः प्रतिकृतिं प्रकटीचकार ।
विभ्रान्तधीर्विधुरतोदितवेपथुः श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ८९ ॥

श्रेष्ठे[3] न्यधापयत चित्रशिलाकुटीरे
या पञ्चतां गतवतो दयितस्य देहम् ।
विक्षारिताश्रुरदसीयगुणस्मृतेः श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ९० ॥

---

1. An alarming carriage accident happened to Her Majesty on the 7th of October, as she was returning with the Princesses Alice and Helena from an expedition to Altnaginthasac. The usual coachman, Smith, was driving the royal party, but after proceeding about two miles in the darkness, though along a good road, the carriage turned over on its side, and all the occupants were precipitated to the ground. The Queen's face was a good deal bruised. 2. A few days afterwards Her Majesty went to Aberdeen to unveil the statue of her lamented husband. She trembled during the ceremony, which was the first she had attended in public since her widowhood. 3. The remains of the lamented Prince Consort were removed from the vault beneath St. George's Chapel to the noble mausoleum at Frogmore, whither Her Majesty, accompanied by all the members of the Royal Family, proceeded on the 14th of December, the anniversary of the Prince's death, and where a devotional service was held.

Digitized by Google

[1]आकस्मिकं प्रियसुतस्य युवक्षितीश-
स्याकर्ण्य या तनयसंभवमाननन्द ।
विश्वादृतप्रथमपौत्रजनुर्महा श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ९१ ॥

[2]यस्यास्तृतीयदुहिता महितान्ववाय-
जाताय सादरमदीयत वल्लभाय ।
विश्वत्र लोक[3]हितकृत्यविधायिनी श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ९२ ॥

[4]केनापि घातुकतमेन कृतां द्वितीय-
सूनोर्दशां भृशमशोचि यया निशम्य ।
विन्दन्त्यवेत्य हृतशल्यममुं मुदं श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ९३ ॥

[5]उद्वाहमङ्गलविधौ वितनार तुर्यां
या नन्दनामभिमतप्रभुनन्दनाय ।

---

1. A joyful but unexpected event occurred at Fragmore on the 8th of January 1864, when the Princess of Wales was prematurely confined of a son, Prince Albert Victor. The event had not been expected until March. Her Majesty was immediately apprised of the happy news of the birth of a direct heir to the Crown. 2. On the 5th of July, 1866, Her Majesty's third daughter, the Princess Helena, was married to Prince Christian of Schleswig-Holstein. 3. In October Her Majesty evinced her interest in the sanitary concerns of the people by opening the fine new water-works at Aberdeen. On the 20th of May, 1867, Her Majesty in person laid the first stone of the Hall of Arts and Science at Kensington Gore. 4. The Duke of Edinburgh, while accepting the hospitality of the friends of the Sailor's Home at Cloutarf, New South Wales, was shot in the back by one O'Farrell. The wound, happily, was not fatal: the ball was extracted, and in eight days the Duke was sufficiently recovered to go on board his ship. 5. Her Majesty's fourth daughter, the Princess Louise, was married to John Marquis of Lorne, eldest son of the Duke of Argyll, on the 21st of March, 1871.

Digitized by Google

विश्लिष्य शोकमनयाधिकमीयुषी श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ९४ ॥

घोरज्वरातुरयुवक्षितिपस्वपुत्र-[1]
नीरोगताधिगतहर्षभराभवद्या ।
विश्वासतो विहितविश्वपतिस्तवा श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ९५ ॥

स्वानुज्ञयैव कृतदारपरिग्रहे[2] या
प्रत्यागते प्रमुमुदे तनये द्वितीये ।
विख्यातधर्मविधिभिर्विलसद्यशाः श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ९६ ॥

या सज्जनाभिमतभारतचक्रवर्ति-[3]
न्याख्यामधादखिलसंमदमादधाना ।

---

1. When Her Majesty returned to Windsor on the 25th of November from her visit to Balmoral, She was met by the disturbing news that a feverish attack from which the Prince of Wales had for some time been suffering, had assumed a grave aspect. On the 8th of December a very serious relapse having occurred, the life of his Royal Highness was in imminent danger. By the Queen's desire, special prayers were used on and after the 10th in all Churches. The National anxiety continued until the night of Wednesday, the 14th—the anniversary of the Prince Consort's death—when there was a slight amelioration of the worst symptoms. From that day forward the Prince continued gradually to recover. The 27th of February 1872, was observed as a day of national thanksgiving for the Prince's recovery. A more joyous and successful celebration was never witnessed in London.
2. On the 23rd of January, 1874, Her Majesty's second son, the Duke of Edinburgh was married to the Grand Duchess Marie of Russia, the ceremony taking place in the Winter Palace at St. Petersburg. In the succeeding March, the royal couple made a public entry into London. The Queen, with the Duchess and the Duke of Edinburgh and Princess Beatrice, drove through the streets of the metropolis in an open carriage.
3. In 1876, the Royal Titles Bill was passed, and Her Majesty was proclaimed Empress of India.

Digitized by Google

[1]विन्यासितप्रियतमप्रतिमान्तरा श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ९७ ॥

[2]यस्या द्वितीयतनयामपनीय भूयः
प्राकाशि निष्करुणता नितरां नियत्या ।
विश्वं विमृश्य विधिवश्यमपव्यथा श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ९८ ॥

[3]यस्यास्तृतीयतनयः क्षितिपालकन्यां
पाणौ चकार जननीहृदयानुवर्ती ।
[4]विद्वद्वरप्रकरसंस्थितिदुःखिता श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ ९९ ॥

[5]तुर्यस्य या प्रियसुतस्य ददर्श दार-
स्वीकारमङ्गलविधिं सहबन्धुवर्गा ।
[6]विज्ञातयोधवरसूनुसमिज्जया श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ १०० ॥

---

1. A statue of the Prince Consort was placed in the Albert Memorial on the 9th of March. 2. Her Majesty's second daughter, Princess Alice, passed away on the 14th of December, 1878, the seventeenth anniversary of her father's death. 3. In March 1879, Her Majesty's third son, the Duke of Connaught was married to the Princess Louise of Prussia. 4. The last month of 1880 and the early months of 1881 were signalized by three great losses in English literature and politics, George Elliot, Carlyle, and the Earl of Beaconsfield having died one after another. 5. The marriage of the Duke of Albany to Princess Helen of Waldeck-Pyrmont was celebrated on the 27th of April 1882, in the presence of Her Majesty and the Royal Family. 6. When the Egyptian war broke out the Duke of Connaught was amongst the officers who accompanied Sir Garnet Wolseley into Egypt. The progress of the campaign was watched with much solicitude by Her Majesty. A telegram arrived at last: 'A great victory; Duke safe and well;' and this was succeeded by a fuller one containing the words, 'the Duke of Connaught is well and behaved admirably, leading his brigade to the attack.'

Digitized by Google

सोपानतः स्खलितपादयुगा पतित्वा
या व्याधिता चिरमभूद्वत भग्नजानुः ।
विश्वैकनाथदयया विगतव्यथा श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ १०१ ॥

[2]हा कष्टमिष्टतमतुर्यसुतं परेत-
माकर्ण्य शोकजलधेस्तलमस्पृशद्या ।
विच्छिन्नदग्विसृमरास्त्रझरस्त्रवैः श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ १०२ ॥

[3]अन्त्यामयच्छदनुरूपवराय कन्या-
मश्रान्तमात्महितकृत्यपरायणां या ।
विश्रान्तधीर्विहितकृत्यतया भृशं श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ १०३ ॥

[4]भूयस्तराणि जनभावुकसाधकानि
कर्माणि या मतिमती कलयांचकार ।

---

1. In March 1883, while Her Majesty was at Windsor Castle, she slipped upon some stairs, and, falling, sprained her knee. The accident was at first regarded as of slight consequence, but it became the source of much pain and inconvenience. Eventually these ill effects passed away, but not until the expiration of a year from the time of the accident. 2. A great trial befell Her Majesty in 1884 by the untoward death of her youngest son, the Duke of Albany. 3. On the 23rd of July, 1885, the marriage of the Princess Beatrice with Prince Henry of Battenberg was celebrated in the presence of Her Majesty, the Royal Family, and a distinguished party of English Nobility and others. With this wedding the Queen saw the last of her children united in bonds of matrimony. 4. On the 24th of March, 1886, Her Majesty laid the foundation stone of the new Medical Examination Hall of the Royal Colleges of Physicians and Surgeons. The Colonial and Indian Exhibition—the most successful and extensive of a series of admirable Exhibitions at South Kensington—was opened by Her Majesty on the 4th of May. A few days after this the Queen visited Liverpool, where she opened an International Exhibition of Navigation, Commerce, and Industry. On the 10th of June she opened the Royal Holloway College for Women at Mount Lee, Egham.

Digitized by Google

[1]विख्यातिमत्स्वकुलपुष्कलताञ्चिता श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ १०४ ॥
[2]पञ्चाशदब्दमितमद्य यदीयमिन्धे
साम्राज्यमूर्जिततरं दययेश्वरस्य ।
विश्वावनार्थमधुनापि कृतश्रमा श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ १०५ ॥
[3]सम्यक्सभाजयति संप्रति सान्द्रभक्त्या
यां भारतीयजनता विनता नितान्तम् ।
विद्योतमानवितितोत्सवमङ्गला श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ १०६ ॥
यन्नामवर्णगणमन्त्रनिरुद्धवीर्या
नायान्ति [4]मण्डलमिमं विमता भुजङ्गाः ।
वित्रासहीनजनतानुतविक्रमा श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ १०७ ॥
श्रीपूरितो जयति दूरितवैरिबाधो
[5]यद्राज्यभार इह भारतवर्ष एषः ।
विस्तार्यमाणजनताकुशलानिशं श्री-
व्हिक्टोरिया विजयतां शरदां शतं सा ॥ १०८ ॥

इति श्रीव्हिक्टोरियाचरितसंग्रहः संपूर्णः ।

---

1. The sons and daughters of Her Majesty have already become parents of thirty-four princes and princesses, twenty-nine of whom are now living. 2. Her Majesty having succeeded to the throne, on the disease of her Uncle King William IV., on the 20th of June 1837, we are now passing through the fiftieth year of her glorious reign. 3. The Royal Jubilee is being celebrated in Her Majesty's vast Indian Empire with unusual enthusiasm by all castes and creeds. 4. This Empire, i. e. India. मण्डल means also a mystical diagram which snake-charmers draw as a protection and from which serpents always keep away. 5. इह यद्राज्यभारे एष भारतवर्षः, इह भारतवर्षे एष यद्राज्यभारः, इत्युभयथा योजनेह श्लेषः

Digitized by Google

भावत्कावनिमण्डलस्य महतः कोणे वसन्दक्षिणे
कोऽपि ख्यापयितुं भवत्सुगुणसंदोहानसाधारणान् ।
पद्यैरद्य तवानवद्यचरितं यत्किंचिदुत्कीर्तय-
न्नाशास्ते गतरोगतामविहतां द्राघीय आयुश्च ते ॥ १ ॥

चारित्रैकधना मनस्विनितमा वञ्चिक्षमाधीश्वरी
लक्ष्मीरस्य जनस्य वल्लुभतमा नित्यानुरक्ता त्वयि ।
त्वामालेख्यगतामनेन सहिता भक्तेन संसेवते
त्यक्तान्यस्मरणोषसि प्रतिदिनं व्हिक्टोरियाधीश्वरि ॥ २ ॥

क्षेमायाविरभूदशेषविदुषां सा माननीया स्वयं
भूमावम्बुजसंभवप्रणयिनीत्युत्प्रेक्ष्यमाणा जनैः ।
सामानाधिकरण्यभूःसरसयोः संगीतसाहित्ययोः
सीमातीतगुणाम्बुधिर्विजयते त्वामाश्रितेयं सदा ॥ ३ ॥

यस्याः सज्जनसंमतं गुणमिह स्त्रीणामसाधारणं
सारज्ञा त्वमवेत्य भारतमहाराजाधिराजेश्वरि ।
अव्याजादरमादधा अनुपमामह्वाय संमाननां
सेयं श्रेयसि जाग्रती वितनुते सेवां तवानारतम् ॥ ४ ॥

यामुच्चैरनुकम्पयावति सुता **सावेरि**हानारतं
यस्या राजति **शंकराभरण**वत्कीर्तिः कलङ्कोज्झिता ।
राज्ञी सेयमनुग्रहात्तव परं **कल्याणि**नी स्याच्चिरं
लोकानन्दकरी शुभैरविरलैः सौजन्यजन्यैर्गुणैः ॥ ५ ॥

स्त्रीणामीदृशवैदुषी क्व भवति क्षोणाविहेत्युच्चकै-
र्नृणामद्भुतकारिणी गुणवतां त्राणाय नित्योद्यता ।
एणाक्षीमणिरत्र गाननिपुणान्वीणाप्रवीणानपि
ह्वीणानादधती विभाति तदपि क्षीणावलेपा स्वयम् ॥ ६ ॥

---

1. The large types denote the names of four native tunes.

Digitized by Google

श्रीवञ्चिक्षितिपालवंशमहितालंकारमुक्तामणिः
श्रीमत्पूर्वनरेन्द्रसंचितयशोनिक्षेपरक्षामणिः ।
श्रीपादाश्रितसर्वसज्जनसमस्ताभीष्टचिन्तामणिः
श्रीलक्ष्मीधरणीश्वरी विजयते स्त्रीलोकचूडामणिः ॥ ७ ॥

एनां यौवनतः पुरैव परिणीयैतत्समेतश्चिरं
विद्यासु व्यवसायवानयमभूद्भूयो विधेयस्तव ।
नित्यं शक्त्यनुसारतो विरचयन्विद्याप्रचारे श्रमं
वाक्पुष्पाञ्जलिमर्पयत्यमुमयि त्वत्पादपाथोजयोः ॥ ८ ॥

अस्य च्छात्रेषु मुख्यावधिगतकवितामाधुरीसाधुरीती
बुद्ध्या सूक्ष्मार्थबोधक्षमतमविमलोन्मेषया श्लाघनीयौ ।
पुण्यश्लोकां स्तुवन्तौ पुरुतरकुतुकात्त्वां महेऽस्मिन्महीय-
स्येतावप्यादधाते तव पदयुगले पद्यपुष्पोपहारम् ॥ ९ ॥

श्रीनाथानुग्रहेण प्रगुणमनुभवन्त्यायुरारोग्यभाग्यं
श्रीपुष्टस्वीयभूयस्तरविषयजनस्तोमसंस्तूयमाना ।
श्रीमद्व्हिक्टोरियाधीश्वरि विशदयशोराशिनीशारिताशा
श्रीमत्या स्वप्रसूत्या सह विहर चिरं पुत्रपौत्रीणया त्वम् ॥ १० ॥

केरलवर्मा ।

Digitized by Google

Digitized by Google

अथ

श्रीव्हिक्टोरियाचक्रवर्तिनीगुणमणिमाला ।

माङ्गल्याय शिवौ स्तां यौ दीर्घविसार्यपाङ्गरश्मिमिषात् ।
प्रायोऽनङ्गकृशाङ्गीमङ्गलगलसूत्रकल्पनाकार्मौ ॥ १ ॥
उद्दामौजःप्रसरैराक्रान्ताखण्डभरतभूखण्डा ।
सन्मार्गनित्यसक्ता देवी व्हिक्टोरिया जयति ॥ २ ॥
लोकोत्सवे महति भारतसार्वभौमी-
पञ्चाशभूभरणहायनपूर्तिनाम्नि ।
जल्पामि यत्किमपि कन्दलितप्रमोद-
प्राग्भारदूरविवशीकृतमानसोऽहम् ॥ ३ ॥
रम्यैर्गुणैः कलशसिन्धुजमौक्तिकाभै-
र्व्हिक्टोरियाभरतभूतलसार्वभौम्याः ।
संचोद्यमानममनागपि मन्दबुद्धेः
काव्ये मनः प्रयतते मम साहसिक्यात् ॥ ४ ॥
ओजःप्रसादसमताः कविमात्रवेद्या
मा नाम सन्तु मम काव्यगुणा वचःसु ।
ता एव चेन्त्रिजगतीविदिताः स्फुरन्ति
व्हिक्टोरियाश्रयिगुणा गुण एष एव ॥ ५ ॥

---

१. प्राय इति संभावनायाम् । अत्र च शिवयोर्विशिष्टापाङ्गरश्मिगतरश्मित्वापह्नव-पुरस्कारेण मदनवधूमाङ्गल्यसूत्रनिर्माणतत्परत्वमुत्प्रेक्षते इति सापह्नवोत्प्रेक्षा । तथाविधेन चोत्प्रेक्षणेनापाङ्गानां मन्मथोज्जीवनक्षमत्वं ध्वनितम् ॥ २. अत्र श्लिष्टविशेषणोपन्यासमहिम्ना श्रीव्हिक्टोरियायां सूर्यमण्डलीव्यवहारप्रतीतेः समासोक्तिः ॥ ३. भारतसार्वभौम्याः पञ्चाशो यो भूभरणहायनस्तत्पूर्तिनाम्नि ॥ ४. गुणानामतिनिर्मलत्वधर्मो विशिष्टमौक्तिकसादृश्यं प्रयोजयति ॥ ५. उभये तावदोजःप्रसादसमताख्या गुणाः काव्याश्रयिणो व्हिक्टोरियाश्रयिणश्च । तत्र काव्यगुणवैकल्यमप्यगणयंश्चक्रवर्तिनीगुणोत्कीर्तनपरत्वमात्रेण स्वग्रन्थं कविर्गुणवन्तं मन्यते । उभयविधानां च गुणानां व्यतिरेकमाविष्कर्तुं कविमात्रवेद्याः त्रिजगतीविदिता इति च विशेषणे ॥

Digitized by Google

मा स्मैव भूदुचितनायकचिन्तना वः
काव्यक्रियासु कुतुकं यदि हे कवीन्द्राः ।
अत्यादिराजनिवहा विमलैश्चरित्रै-
र्नन्वस्ति भारतमहीतलसार्वभौमी ॥ ६ ॥

साम्राज्यमुग्रबहुभूभुजि भारतेऽस्मि-
न्देवी यदाभजत लण्डननायिकेयम् ।
चेतस्तदा प्रभृति बिभ्रति सावहेलं
मान्धातृनैषधशिबिप्रमुखेषु लोकाः ॥ ७ ॥

नीतिः प्रतापगरिमा ऋतमूर्जितं वा
सर्वे गुणास्त्वयि नलादिवदेव देवि ।
एतानि तानि जगदेकहितावहानि
कर्माणि किंत्वनितराचरितानि भान्ति ॥ ८ ॥

वीतानडुत्तुरगयोजनसंकथाना-
माधावतामति सुपर्णमरुन्मनांसि ।
व्हिक्टोरियेश्वरि न किं जनसौख्यहेतो-
र्धूमानसामवितथां व्यतथाः प्रथां त्वम् ॥ ९ ॥

अज्ञातघासनिचयग्रसनप्रयास-
मम्लारनालकनिचूषणवीतलोभम् ।
व्योमाभिगामि शकटीं गमयत्पृथिव्या-
मेतत्कथं पुनरुदैक्षि विचित्रयुग्यम् ॥ १० ॥

---

७. उग्रबहुभूभुजीति विशेषणं साम्राज्यभजनस्य निरतिशयप्रतापनिष्पाद्यताध्वननाय । संबन्धातिशयोक्तिरलंकारः ॥ ८. एतानि वक्ष्यमाणानि । उपमानोपमेययोः समानलिङ्गत्वनियमात्कथं नलादीनामुपमानतयोपादानम्, इति यदि कश्चिच्चोदयेत्तस्यैकविंशः श्लोक उत्तरं दास्यति ॥ ९. धूमानसां धूमवाह्यानां शकटानाम् । विपूर्वात्तनोतेर्लुङि थासि रूपं व्यतथा इति ॥ १०. युगं वहतीति युग्यम् । प्रसिद्धं हि युग्यं यवसनिचयं ग्रसते सौवीररसं चूषति भूमौ गच्छदेव भूमौ शकटीं गमयति । तद्विलक्षणं तु धूमाभिधानं युग्यमित्याश्चर्यभूमिः ॥

Digitized by Google

भूत्वा कवेरतनयातटभाक्प्रभाते
सायं विलोकयति चन्दनशैलकन्याम् ।
धूमानसा यदतिवातजवेन लोकः
सोऽयं तवैव महिमा जगदेकवीरे ॥ ११ ॥
त्वं कानि कानि न हितानि तनोषि लोह-
तन्त्रीनिरन्तरनियोजनया जनानाम् ।
यद्वैभवादुपलभन्त उदन्तमेते
द्वीपान्तरीयमपि देवि निमेषमात्रात् ॥ १२ ॥
एवंविधं किमपि विस्मयनीयमूचे
प्राङ्मेदिनीमघवतामृषिभिर्न कर्म ।
यच्चोदितं तदखिलं कलितं त्वयापि
हे देवि लण्डनमहापुरकल्पवल्लि ॥ १३ ॥
त्वं जीवनैकरसशीतकभूपपाश-
पालीपयोधरततिप्रतिपन्नबाधाः ।
विद्यामरालमुदृशोऽवसि पाठशाला-
पाथोजिनीकलनया विदुषी शरद्वत् ॥ १४ ॥
किंचाखिलेषु नगरेषु भिषक्प्रवेका
निस्तीर्णवैद्यकपयोनिधयो भवत्या ।
उल्लाघतां जनयितुं लघु रोगभाजां
यूरोपदेवि करुणार्द्रधिया नियुक्ताः ॥ १५ ॥

---

११. कवेरतनया कावेरी । चन्दनशैलकन्या ताम्रपर्णी । धूमानसा धूमशकटेन करणेन ॥ १२. यद्वैभवाल्लोहतन्त्रीनिरन्तरनियोजनवैभवात् ॥ १३. प्राङ्मेदिनीमघवतामादिराजानां नलादीनाम् ॥ १४. यथा हि शरज्जलैकरसशीतलकादम्बिनीबाधिता हंसीः पद्मिनीसंवर्धनेन परिपुष्यति तथा पाठशालाकल्पनेन प्राणधारणमात्रलम्पटालसदुर्भूपतिपालीबाधिता विद्याः परिपुष्यसीत्युपमात्र चमत्कृतिहेतुः ॥ १५. उल्लाघतां नीरोगताम् । लघु क्षिप्रम् ॥

Digitized by Google

प्राग्भूमिपालपरिकल्पितचैत्यभाजां
पर्याप्तवित्तनिचयप्रतिपादनेन ।
नक्तंदिवं समुचितां दिविषन्मणीनां
हे देवि कारयसि साधु महासपर्याम् ॥ १६ ॥
किं वर्णयामि धरणीश्वरि पूर्तपूर्ति-
कीर्तिं तव त्रिजगतीपरिकीर्त्यमानाम् ।
यत्प्राणिनो जहति तापभरं तपेऽपि
वापीसरःप्रहिगतैर्मधुरैः पयोभिः ॥ १७ ॥
भिन्ना न धूमशकटायनकल्पनाय
पृथ्वीधराः कति गुहाः कति नावखाताः ।
कत्यालयोऽब्धिषु वणिग्गणमङ्गलाय
बद्धा न भारतमहीश्वरि ते निदेशात् ॥ १८ ॥
भेदादिषु त्रिषु किलेन्द्रविशाखरामाः
कर्तृत्वमङ्गचकृषतान्यतमस्य नाम ।
आज्ञा पुनर्वसुमतीश्वरि तेऽखिलानां
कर्त्रीत्यतो न विबुधानपि नातिशेषे ॥ १९ ॥
पश्यामि युक्ततरमेव तदेतदार्या
यत्पुण्यभूमिरिति भारतभागमाहुः ।
नो चेत्कथं महितनीतिपरायणास्य
यूरोपदेवि भवती परिपालिका स्यात् ॥ २० ॥

१६–१७. आभ्यां पद्याभ्यामिष्टापूर्तकर्मनिष्पत्तिः प्रतिपादिता ॥ १८. धूमशकटायनकल्पनाय धूमशकटमार्गनिर्माणाय । आलयः सेतवः ॥ १९. भेदादिषु प्रागुक्तेषु भेदनखननबन्धनेष्वन्यतमकर्तृत्वमुपमानानामुपमेयस्य तु तत्रितयकर्तृत्वमिति स्फुटो व्यतिरेकः ॥ २०. माननीयनीतिशालिन्या चक्रवर्तिन्या परिपाल्यमानत्वात्पुण्योपलक्षिता भूमिः पुण्यभूमिरित्यन्वर्था संज्ञा भारतभागस्येति भावः । 'आर्यावर्तः पुण्यभूमिर्मध्यं विन्ध्यहिमागयोः' इत्यमरः ॥

Digitized by Google

सुक्षत्रियासु ऋषिगीतमहागुणासु
साम्राज्यमुख्यपदमेकतमापि नाभूत् ।
एवं स्थिते त्वदुपमानतया ग्रहीतुं
शक्ष्यामि कां स्त्रियमरातिगजेन्द्रसिंहि ॥ २१ ॥
प्रौढप्रतापपरितापितसाधुलोक-
प्रत्यर्थिदैत्यकुलखण्डनकेलिकारी ।
हे देवि लण्डनपुरेश्वरि सैव साक्षा-
दक्षामकान्तिललिता ललिताम्बिका त्वम् ॥ २२ ॥
वाग्देवतैव किमियं प्रियसत्यनिष्ठा
श्रीरेव किं नु समुपाश्रितचक्रपाणिः ।
आर्यैव किं न्ववनिभृद्वरवंशरत्न-
मेवं हि देवि भवतीं प्रति संशयो नः ॥ २३ ॥
ओजस्विनी प्रकृतिमञ्जुलकान्तिरीति-
रौदार्यभाग्बुधजनाकलितप्रसादा ।
आभासि निर्भरमलंकृतिवर्गहृद्या
सत्काव्यसंपदिव भारतसार्वभौमि ॥ २४ ॥
त्वं वाहिनीपरिवृढोदयहेतुराजि-
ष्वाटोपमात्रविनिवर्तिततामसौघा ।
बद्धादरा कुवलयप्रियसंविधाने
संराज्ञि पार्विकसुधाकरमण्डलीव ॥ २५ ॥

---

२१. साम्राज्यमुख्यपदं साम्राज्यमुख्यस्थानम् । दमयन्त्यादिषु तु भर्तृद्वारकं साम्राज्यमिति तासां साम्राज्यगौणपदत्वमेव । उपमानलुप्तोपमा ॥ २२. दैत्यसदृशाः प्रत्यर्थिन इति प्रकृते योजना । केलिं करोतीति केलिकारी । कर्मण्यण् । स्त्रियां ङीप् । ललितं विलासः । रूपकमलंकारः ॥ २३. सत्यं ऋतम्, लोकविशेषश्च । समुपाश्रितं चक्रं रेखाविशेषो याभ्यां तौ पाणी यस्याः, समुपाश्रितश्चक्रपाणिर्विष्णुर्यया इति बहुव्रीहिद्वयम् । अवनिभृत्पदं राजपर्वतवाचकम् । ससंदेहः ॥ २४. ओजः कान्तिरीत्यौदार्यप्रसादाः काव्ये प्रसिद्धाः । उपमालंकारः ॥ २५. वाहिनीपरिवृढः सेनानीः, समुद्रश्च । आजिषु युद्धेषु । तामसौघः तमःसंबन्ध्योघः, खलौघश्च । अलंकारः प्राग्वत् ॥

Digitized by Google

किं प्रत्यय न विदधासि परं प्रकृत्याः
किं तद्धितप्रणयनप्रवणा न भासि ।
किं न क्षितीश्वरि निपातयसि प्रणाय्यं
किं नाम नाचरसि पाणिनिगीरिव त्वम् ॥ २६ ॥
अत्यर्थं सरसप्रसन्नसुमनःकासारमक्षोभय-
न्संरब्धाः प्रधनेषु दानवसमाश्चण्डा अकाण्डेऽपि ये ।
दिष्ट्याखण्डिषत प्रचण्डतरदोर्दण्डप्रतापप्रथा-
शौण्डाश्चण्डिकयेव लण्डनमणे ते मण्डलेशास्त्वया ॥ २७ ॥
येऽतीत्य सत्यमपहाय दयां तितिक्षां
संतक्ष्य नीतिमपनीय विधूय धर्मम् ।
जघ्नुर्जगन्ति ननु ते करवालधारा-
कारावासविषयाः कलिता भवत्या ॥ २८ ॥
विक्रान्तैस्तावकीनैः सुभटपरिवृढैर्बृंहितध्वस्तनिद्र-
क्रुध्यद्धर्यक्षलक्षीकृतमदविवशोद्दामदन्तीन्द्रलीलाम् ।
आनायिष्यन्त ते ते न यदि नृपतयो नीतिपद्यादविष्ठा
व्यक्तं व्हिक्टोरियोर्वीश्वरि भुवनमिदं दुःखपङ्केष्वमङ्क्ष्यत् ॥ २९ ॥
नयपथकृतासक्ते व्हिक्टोरियेश्वरि हे नृणां
विविधविषयास्वादानन्दप्रथाधिगमो ह्ययम् ।
अयमुपचितश्रेयःसंपत्त्यखण्डफलोदयो
यदणकमहीनाथव्यूहव्यपोहनमातथाः ॥ ३० ॥

---

२६. प्रत्ययं विश्वासम्, सन्क्यजादिप्रत्ययं च। परम् उत्कृष्टम्, अनन्तरं च। प्रकृत्याः प्राणिनो धात्वादेश्च एकत्र षष्ठी, अन्यत्र पञ्चमी। तस्याः प्रकृतेर्हितप्रणयनप्रवणा हितनिष्पादनतत्परा, अथ च तद्धिताख्यप्रत्ययप्रणयनप्रवणा। निपातयसि दण्ड्यसि । प्रणाय्यमनिष्टम् । पाणिनिगोस्तु 'प्रणाय्योऽसंमतौ' (३।१।१२८) इति प्रणाय्यशब्दं निपातयति । प्राग्वदलंकारः ॥ २७. अकाण्डेऽप्यसमयेऽपि । प्रधनेषु युद्धेषु । संरब्धाः संरम्भवन्तः । अलंकारः प्राग्वत् ॥ २८. केचित्करवालधाराविषयाः केचित्कारा-विषयाः केचिद्विवासविषयाश्च कलिताः ॥ २९. आनयतेः कर्मणि लङ् । 'स्यशिच्सीयुट्तासिषु–' (६।४।६२) इत्यादिना चिण्वद्भाव इट् च । अत्रारोपविषयस्याशाब्दत्वादार्थी निदर्शनेत्येके । वर्ण्यवाक्यार्थप्रतिबिम्बवर्णनाल्ललितमित्यपरे ॥ ३०. अणकमहीनाथाः कुत्सितभूपतयः । मालानिदर्शना ॥

Digitized by Google

दृप्यत्पुष्पेषुरोषोदयकलुषमहाकालफालाक्षिकोणो-
द्गीर्णस्थूलस्फुलिङ्गज्वलदनलशिखाटोपपाटच्चरोऽयम् ।
देवि प्रत्यर्थिपृथ्वीपतिनिचयपिचूकारकेलीषु दक्षः
क्षोणीक्षेमाय दिक्षु स्फुरति तव कविस्तूयमानः प्रतापः ॥ ३१ ॥

उत्कूलोदित्वरमदरसोत्पीडसंशोषचुञ्चुं
कुर्वन्तोऽन्तर्नृपकुलमणे त्वत्प्रतापौर्ववह्निम् ।
एते तावद्दृशमपि शतैः सेविता वाहिनीनां
सन्मर्यादां जलधय इव क्ष्माभुजो नातियन्ति ॥ ३२ ॥

निःशेषोद्धतलोकशात्रवतिरस्कारी प्रतापस्तवे-
त्याशासु प्रथतेतरां कवयतां कैषा मृषा घोषणा ।
अश्रान्तं स हि वाडवानलशिखापाण्डित्यवैतण्डिको
यूरोपेश्वरि लोकबान्धवतिरस्काराय संनह्यति ॥ ३३ ॥

हे देवि चक्रवर्तिनि तुभ्यं संख्यातिगान्करान्दत्त्वा ।
एकं भूमघवन्तो गृह्णन्ति त्वत्करालम्बम् ॥ ३४ ॥

आकीर्णभूरिकरहाटकभूभृदुद्द्रुपादोपसेवनकथां परिहर्तुमेते ।
भूभृन्मणेर्नृपतयस्तव देवि पादं चित्रं विकीर्णकरहाटकमाश्रयन्ति ॥ ३५ ॥

---

३१. पिचूकारस्तूलीकरणम् ।। ३२. उत्कूलं यथा भवति तथा उदित्वरस्य मदरसस्य मदरूपजलस्य य उत्पीडस्तस्य संशोषेण वित्तम् । अन्तश्चित्ते, मध्ये च । वाहिनीनां सेनानां नदीनां च शतैः सेविता अपि । अनेन हि विशेषणेन मदरसोत्कूलोद्गमनस्य कारणसामग्री दर्शिता । रूपकमुपमा चात्र चमत्कृतिहेतुः ।। ३३. स हि प्रतापो हि । लोकस्य ये बान्धवा हितकारिणस्तेषां तिरस्काराय, अथ च लोकबान्धवस्य सूर्यस्य तिरस्काराय । व्याजस्तुतिरियम् ।। ३४. करान्बलीन्, हस्तांश्च । त्वत्करालम्बं त्वत्साह्याय्यम् । न्यूनपरिवृत्तिः ।। ३५. आकीर्णा भूरिकरहाटका बहुमदनद्रुमा यस्मिंस्तस्य भूभृदुद्द्रुपादस्य शैलश्रेष्ठप्रत्यन्तपर्वतस्य सेवनकथाम् । परिहर्तुं त्यक्तुम् । भूभृन्मणेः शैलश्रेष्ठस्य, भूपतिश्रेष्ठायाश्च तव । विकीर्णाः करहाटका वृक्षविशेषाः, अथ च विकीर्णानि करहाटकानि करभूतानि स्वर्णानि यस्मिंस्तम् । पादं प्रत्यन्तपर्वतम्, चरणं च । त्वत्पादसेवया राजानो वनवासं परिहरन्तीति भावः । अत्र विशिष्टपादसेवापरिहाराय पादसेवामेव कुर्वन्तीति विचित्रालंकारश्चमत्कारधाम ॥

Digitized by Google

सङ्ग्रामाङ्गणसंगमप्रकटिताटोपो भटग्रामणी-
गृह्णीते शरदभ्रभाभरभृतं भावत्क एकं यदा ।
नैकं भारतचक्रवर्तिनि तदैवोज्झन्त्यहो चामर-
ग्राहिण्यः करवालमुज्ज्वलमरिक्ष्मापालपालीजुषः ॥ ३६ ॥
आहुर्मृषारिनगरं तव नुन्नराज-
श्रीकं व्यधायि सुभटैरिति नाम लोकाः ।
आलक्ष्यते स्फुटमिदं ह्यरिमेदिनीप-
स्तोमावृतं बहुचमूरुचितं च देवि ॥ ३७ ॥
लीलां कलयति रणभुवि भवद्भटेन्द्रेऽभियातिभूपालः ।
खिन्नोऽपि पत्रपातादपत्रपातो निलीयते क्वापि ॥ ३८ ॥
क्व मे परिजनो गतः क्व खलु नाम ते मन्त्रिणः
क्व सा हरिणलोचना गतगतः स मे पुत्रकः ।
इति प्रलपितालसस्त्वदरिवीरवीरव्रजो
वनंवनमटत्यटत्यवनिमण्डलाधीश्वरि ॥ ३९ ॥

---

३६. शरदभ्रभाभरभृतं शरदाकाशकान्त्यतिशयशालिनम्, शरन्मेघकान्त्यतिशयशालिनं च । भवत्या अयं भावत्कः । नैकमनेकम् । करवालमसिं करस्थितं वालं चामरं च अरिक्ष्मापालपालीजुषः शत्रुभूपपालीसेविन्यः । तव सुभटे खड्गमेकं गृह्णति सति शत्रवो राज्यभ्रष्टा भवन्तीति भावः । कार्यकारणयोरैकाल्यप्रतिपादनादतिशयोक्तिरियम् ॥ ३७. हि यस्मात्कारणादरिनगरमरिमेदिनीपस्तोमेन शत्रुराजसमूहेनावृतं व्याप्तं बह्वीभिश्चमूभिः सेनाभी रुचितं शोभितं च स्पष्टं दृश्यते, तस्मात्तव सुभटैररिनगरं निरस्तराजलक्ष्मीकं व्यधायीति मिथ्यैव लोका वदन्ति इति मुखे प्रकाशमाना निन्दा । अरिमेदो वृक्षविशेषोऽस्त्यस्मिन्नित्यरिमेदि । 'अत इनिठनौ' (५।२।११५) इतीनिः । नीपस्तोमेन कदम्बसमूहेनावृतम् । बहुभिश्चमूरुभिर्मृगविशेषैश्चितं व्याप्तमित्यर्थाश्रयणेऽरिनगरस्य वनप्रायतावगमनेन नुन्नराजश्रीकत्वध्रौव्यात्स्तुतिमेव सुभटानामभिव्यनक्ति । 'अरिमेदो विट्खदिरः' इत्यमरः ॥ ३८. अभियातिभूपालः शत्रुभूपः । पत्रपाताद्वाहनपातात् । अपत्रपातः पत्रपातरहित इति विरोधः, लज्जात इति परिहारः । अपत्रपाशब्दात्तसिः ॥ ३९. गतगत इत्यत्र 'आबाधे च' (८।१।१०) इति द्विरुक्तिः प्रयोक्तुः पुत्रविरहपीडां द्योतयति । वीरवीरेत्यस्य ईषद्वीरेत्यर्थः । 'प्रकारे गुणवचनस्य' (८।१।१२) इति द्वित्वम् । वनंवनं कृत्स्नं वनम् । 'नित्यवीप्सयोः' (८।१।४) इति वीप्सायां द्वित्वम् । अटत्यटति अभीक्ष्णमटतीत्यर्थः । नित्येऽर्थे द्वित्वम् ॥

Digitized by Google

त्वदोजःशौटीरप्रतिभटवधूटीकुचतटी-
पटीरश्रीधाटीप्रकटपटुलुण्टाकमनघम् ।
तपारम्भोद्दीप्रद्युमणिरमणीयं प्रगुणय-
त्प्रजानां भद्राणि प्रसरति मुखे देवि ककुभाम् ॥ ४० ॥
व्यदधत रणरङ्गेऽभिक्रमं सैनिकास्ते
सपदि रिपुनृपालास्तन्वतेऽपक्रमं स्म ।
उदभवदुभयेषां भारतेश्वर्यमीषा-
महह कथमपूर्वा कीर्तिपूर्तिः समाना ॥ ४१ ॥
अधिकमयशस्तो मां धत्ते समुत्सृजति क्षणा-
त्परिजनसुहृद्वर्गं किंच प्रजावनसस्पृहः ।
अखिलभरतक्षोणीखण्डाधिराज्ञि न केवलं
तव पदनतो यावद्विद्वेषभागपि भूपतिः ॥ ४२ ॥
देवि सुधारसशीता करुणा परतापदः प्रतापश्च ।
ज्योत्स्नातपाविवैतौ त्वय्येकत्र स्थितिं भजतः ॥ ४३ ॥
लोकत्रयीपणितसच्चरितः प्रतापो
हृद्या जनैरनवगीतगतिश्च नीतिः ।
हे चक्रवर्तिनि परस्परसव्यपेक्षौ
त्वय्येव खेलत इमावुपकारिकायाम् ॥ ४४ ॥

---

४०. त्वदोजस्त्वत्प्रतापः । शौटीरेत्यस्य मत्तेत्यर्थः । लुण्टाकं चौरम् ॥ ४१. 'अहितान्प्रत्यभीतस्य रणे यानमभिक्रमः' इत्यमरः । अपक्रमः पलायनम् । उभयेषां त्वत्सैनिकानाम्, रिपुनृपालानां च । अपूर्वा अभिनवा, अकारपूर्वा च । अथवा अपूर्वशब्दस्योभयत्र तुल्य एवार्थः । परंतु कीर्तीत्यतः प्राक्सवर्णदीर्घेणाकारान्तरं प्रश्लिष्य पक्षे योजना । तुल्ययोगिता ॥ ४२. अयेन शुभावहविधिना शस्तः प्रशस्तः सन्मां लक्ष्मीमधिकं धत्ते । समुत्सस्तोषः सन्परिजनसुहृद्वर्गं क्षणात्सृजति संपादयतीत्यर्थः । किंच प्रजावने प्रजारक्षणे सस्पृहः साभिलाषः । भवतीति शेषः । इति पदनतभूपतिपक्षे योजना ॥ अयशःस्तोमानकीर्तिसमूहानधिकं धत्ते परिजनसुहृद्वर्गं प्रजाश्च समुत्सृजति त्यजति वनसस्पृहः । अरण्यगमनोन्मुख इत्यर्थः । भवतीति शेषः । इति विद्वेषिभूपतिपक्षे योजना ॥ अलंकारः प्राग्वत् ॥ ४४. उपकारिकायामुपकर्त्र्याम्, सौधे च । 'उपकारिकोपकर्त्र्यां पिष्टभेदे नृपालये' इति मेदिनी । अत्र विशेषणसाधारण्यश्लेषलिङ्गैः प्रतापनीत्योर्दंपतिव्यवहारप्रतीतेः समासोक्तिः ॥

Digitized by Google

यूरोपद्वीपभागेश्वरि कविविबुधामात्यदत्तानुवृत्तिः
प्रक्रान्ताश्रान्तसेवा बहलपरिलसच्छोभनक्षत्रवृन्दैः ।
सन्मार्गैकावलम्बा खलु सकलकलापुष्कला भारतोर्व्याः
संतोषं पोपुषीषि त्वमिषकुमुदिनीप्रेयसो मण्डलीव ॥ ४५ ॥

उर्वीधवकरहाटककदम्बकं गृह्णती महाराज्ञि ।
जयतितरां कलिताखिलजात्युच्छासा वनीव नीतिस्ते ॥ ४६ ॥

हृद्येकं कुरुषे नयापनययोर्धत्से द्वयोर्निर्णयं
शक्तीस्तिस्र उपैषि साधु चतुरः सामादिमान्बुध्यसे ।
नृणां पञ्च भयान्यपोहसि गुणान्षट् सेवसे रक्षसि
त्वं सप्त प्रकृतीर्दिशोऽष्ट जयसि श्रीभारताधीश्वरि ॥ ४७ ॥

उद्वेलप्रतिघोष्मकोष्णकिरणद्योतावलीढाणक-
क्षोणीनाथमरुस्थलानुसरणायासोपतप्तात्मनाम् ।
सान्द्रानन्दथुकन्दलीं विदधती विश्वंभराभृन्मणे-
र्यूरोपेश्वरि निर्मला प्रभवति त्वन्नीतिमन्दाकिनी ॥ ४८ ॥

---

४५. कविभिर्विबुधैरमात्यैश्च दत्तानुवृत्तिः, अथ च कविना शुक्रेण विबुधामात्येन गुरुणा च दत्तानुवृत्तिः । बहलानां परिलसतां शोभनानां क्षत्राणाम्, अथ च परिलसच्छोभानां नक्षत्राणां वृन्दैः । इषेत्यस्याश्विनमासेत्यर्थः ॥ ४६. उर्वीधवसंबन्धिनां करभूतानां हाटकानां कदम्बकं समूहम्, अथ च उर्वीति च्छेदः । महतीत्यर्थः । धवस्य करहाटकस्य कदम्बकस्य च समाहारः । 'विभाषा वृक्षमृग–' (२।४।१२) इत्यादिना एकवद्भावः । जातिर्वर्णः, लताविशेषश्च ॥ ४७. एकं परब्रह्म । तिस्रः प्रभुमन्त्रोत्साहरूपाः । चतुरः सामदानभेददण्डान् । पञ्च । यदाह कामन्दकः—'आयुक्तकेभ्यश्चोरेभ्यः परेभ्यो राजवल्लभात् । पृथिवीपतिलोभाच्च प्रजानां पञ्चधा भयम्' इति । षट् संधिविग्रहादयः । सप्त स्वाम्यमात्यादयः ॥ ४८. प्रतिघः कोप एव ऊष्मकोष्णकिरणद्योतो ग्रीष्मसूर्यातपस्तेनावलीढेत्यादि । विश्वंभराभृन्मणेर्भूपतिश्रेष्ठायाः, अथ च पर्वतश्रेष्ठादिति गम्यते । त्वद्भवः प्रभवः (१।४।३१) इत्यपादानत्वम् ॥

Digitized by Google

क्षिप तृणगणक्षेपं दर्पोद्धुरान्धरणीपती-
न्सामिति जननीपायं पाहि प्रणामपरायणान् ।
उपधिनु सुधीदर्शं छिन्धि च्छलप्रियवेदमि-
त्यलघु यतते नीतौ व्हिक्टोरियावनिनायिका ॥ ४९ ॥

सम्यैः स्तुत्यगुणोज्ज्वलैर्गुरुकविप्रायैश्चिता तन्वती
मन्त्रैर्नीतिकरम्बितैः प्रतिभटक्रूरग्रहोच्चाटनम् ।
भूयोभारतभूमिभावुकभरारम्भप्रियंभावुका
सा त्वन्मन्त्रमहासभा विजयते व्हिक्टोरियाधीश्वरि ॥ ५० ॥

श्रीमानगर्हितगुणः प्रथिताख्य आल्ब-
र्टेड्वर्ड इत्यधिगतोर्जितयौवराज्यः ।
योऽयं चकास्ति तनयस्तव सत्यवत्याः
सत्यं नरेश्वरि स भारतभूतिहेतुः ॥ ५१ ॥

---

४९. व्हिक्टोरियावनिनायिका समिति युद्धे दर्पोद्धुरान्धरणीपतींस्तृणगणक्षेपं क्षिप तृणगणानिव क्षिपतीत्यर्थः । 'उपमाने कर्मणि च' (३।४।४५) इत्युपमाने कर्मणि णमुल् । 'कषादिषु यथाविध्यनुप्रयोगः' (३।४।४६) इति क्षिपधातोरनुप्रयोगः । प्रणामपरायणाञ्जननीपायं पाहि जननीव पाति । उपमाने कर्तरि णमुल् । सुधीदर्शं सकलान्सुधिय उपधिनु उपधिनोति । धिवि प्रीणने । 'कर्मणि दृशिविदोः साकल्ये' (३।४।२९) इति कर्मण्युपपदे दृशेर्णमुल् । छलप्रियवेदं सकलाञ्छलप्रियान्दाम्भिकाञ्छिन्धि छिनत्ति कर्मणि विदेर्णमुल् । इति उक्तप्रकारेण नीतौ राजनयेऽलघ्वनल्पं यथा तथा यतते । क्षिप पाहीत्यादौ 'समुच्चयेऽन्यतरस्याम्' (३।४।३) इति कालसामान्ये लोट् । हिश्च तस्यादेशः क्षेपादिक्रियाविशेषाणां समुच्चयो लोटा द्योत्यते 'समुच्चये सामान्यवचनस्य' (३।४।५) इति क्रियासामान्यवाचिनो यततेरनुप्रयोगः, तदनुरोधादेव लोडन्तस्यार्थविशेषनिर्णयः । सौशब्द्याख्यो गुणः शोभाहेतुः ॥ ५०. गुरुकविप्रायैर्गुरुकवितुल्यैः ॥ ५१. सत्यं ऋतं अस्या अस्तीति सत्यवती तस्याः, अथ च व्यासजनन्याः । भारतस्य भारताख्यवर्षस्य भूतेः संपत्तेर्हेतुः, अथ च भारतस्य महाभारताख्यग्रन्थस्य भूतौ उत्पत्तौ हेतुः । महाभारतकर्तेत्यर्थः । 'भूतिर्मातङ्गश्रृङ्गारे जन्मसंपत्तिभस्मसु' इति रत्नमाला । शब्दशक्तिमूलध्वनिः ॥

Digitized by Google

राकाकान्तार्धचूडामणिवृषभसमभ्यस्तरोमन्थफेन-
स्तोमच्छायासमीची शुभगुणभरिते देवि व्हिक्टोरिये ते ।
क्षीराकूपारवेलावननवविकसन्मल्लिकाकुन्दगौरी
कीर्तिज्योत्स्ना तमिस्रं कुलशिखरिगुहागर्भगाहिच्छिनत्ति ॥ ५२ ॥
भारतवर्षाधीश्वरि नूनं कीर्तिः सितैव तव देवि ।
नो चेदभिरुचिमेषा कथमिव जनयेद्रसज्ञानाम् ॥ ५३ ॥
स जगति महस्तत्ताटश्या नरेश्वरि ते क्वचि-
द्वितरणमयो विद्वद्गोष्ठीनिवेशमयः क्वचित् ।
सहभुजिमयः क्वाप्यातोद्यप्रनृत्तमयः क्वचि-
द्धृदि पुनरभूत्सान्द्रानन्दप्रवाहमयो नृणाम् ॥ ५४ ॥
आज्ञालेखमयावतंसलसितं राज्ञां शिरः कुर्वती
मध्येमन्त्रसभं बुधैः परिवृता सिंहासनाध्यासिनी ।
आयुष्मत्सुतपौत्रनप्तृपरमानन्दैकसंवेदिनी
भूमिं भारतचक्रवर्तिनि शतं संवत्सरान्पालय ॥ ५५ ॥
प्रेयान्केरलवङ्गिमण्डलमहाराज्ञ्याः कविग्रामणी-
रेणीशावविलोचनाधरसुधामाधुर्यधिक्कारिगीः ।
यः शब्दागमवारिधेरुपगतः पारं परं केरले-
ष्वास्ते केरलवर्मनामविदितो राजन्यचूडामणिः ॥ ५६ ॥
तस्यैतस्य नितान्तसंस्तवरसासारोक्षणैः क्षालित-
प्रज्ञः केरलवङ्गिमण्डलमहाराजानुकम्प्यः कविः ।
श्रीपाण्ड्याभिजनः प्रशस्तभरतक्ष्मासार्वभौमीगुण-
ग्रामाग्रेडनशोभमं गणपतिः काव्यं तदेतद्व्यधात् ॥ ५७ ॥ (युग्मकम्)

---

५२. प्रौढोक्तिरूपकातिशयोक्तीनां संसृष्टिः ॥ ५३. सितैव धवलैव, अथ च शर्करैव । 'सितमवसिते च बद्धे धवले त्रिषु शर्करायां स्त्री' इति मेदिनी । अर्थापत्तिप्रमाणालंकारः ॥ ५४. सहभुजिमयः सजग्धिमयः । रूपकं निरवयवं मालारूपं हेत्वलंकारो वा ॥ ५५. मध्येमन्त्रसभं मन्त्रसभामध्ये । 'पारेमध्ये षष्ठ्या वा' (२।१।१८) इति समासः । अत्रारोप्यमाणस्यावतंसस्य लसनक्रियोपयोगायाज्ञालेखात्मना परिणमनात्परिणामालंकारः ॥ ५७. तस्यैतस्य व्हिक्टोरियाचरितसंग्रहकर्तुः ॥

Digitized by Google

स्याच्चेज्जगन्महितवस्तुगुणैकशंसि
निर्दोषशब्दरचनोल्लसितं च काव्यम् ।
वक्रोक्तिपद्धतिदविष्ठमपि प्रकाम-
मावर्जयेद्जुधियां न कथं मनांसि ॥ ५८ ॥

गणपतिकविप्रणीता मञ्जुलकान्तिः प्रकाशतां हृदये ।
श्रीचक्रवर्तिनीगुणमणिमालेयं सहृदयानाम् ॥ ५९ ॥

इति श्रीव्हिक्टोरियाचक्रवर्तिनीगुणमणिमाला संपूर्णा ।

---

५८. वक्रोक्तिपद्धतिदविष्ठमपि किं पुनर्वक्रोक्तिपद्धतिनेदिष्ठमिति भावः ॥

Digitized by Google

Digitized by Google

PREFACE.

In writing this small Poem, the author, in some places, has purposely avoided unnatural exaggeration,—the incurable disease of Oriental Poetry,—and has attempted at a new style. The result, perhaps, may be a failure, and this small work may please neither the Eastern nor the Western reader. As to his incapacity, the author has to repeat the same remark as he has made elsewhere:—

'न जाने नात्मनो मान्यं तथाप्यारभ्यते मया ।
कोकिलाः किल सन्तीति काको मूको न दृश्यते ॥'

Yet he shall feel content if this small book accomplishes his chief aim in presenting it to the Public—to show his deep loyalty and deference to the great Heroine.

A. R. RAJARAJA VARMA,
Student, Senior B. A. Class,
College, Trivandrum.

TRIVANDRUM,
20th June 1887.

अवतारिका ।

विद्वद्वृन्दशिखामणिः सुकविताविश्रामभूर्मद्रपू-
र्विद्यामन्दिरदत्तशस्तबिरुदश्रीपूजितो राजते ।
नित्योदित्वरकीर्तिकान्तिलहरीनीरन्ध्रिताशान्तरः
श्रीमान्केरलवर्मपर्पनृपतिः श्रीवञ्चिराज्ञीपतिः ॥

विविधगुणजुषोऽस्य भागिनेयो
विबुधमणेरत एव लब्धविद्यः ।
अकृत सपदि राजराजवर्मा
कुतुककृते कृतिनां प्रबन्धमेतम् ॥

Digitized by Google

Digitized by Google

अथ

पञ्चाशत्पूर्तिपञ्चाशिका ।

काचिच्छण्डननाम्नि पत्तनवरे भूमण्डलीमण्डने
नित्यानन्दनिलिम्पनाथनगरीसंपन्मदोत्कम्पिनि ।
साम्राज्यश्रियमक्षयां श्रितवती जागर्ति कीर्तिच्छटा-
विच्छायीकृतचन्द्रमा जितरमा भाग्यौघसीमासमा ॥ १ ॥
या पृथ्वीं निखिलां प्रशास्ति नृपतिव्रातोऽपि यां सेवते
नीतिर्नाथवती यया स्पृहयते यस्यै सदेन्द्राण्यपि ।
यस्याः पोषमवाप धर्मसरणिर्यस्या गुणा निस्तुला
यस्यां श्रीरनपायिनी विजयते सैषा समस्तेश्वरी ॥ २ ॥
क्षोणीकोणैकदेशं कमपि कथमपि प्राप्य गर्वायमाणाः
किंराजानोऽपि लोके कविभिरनुदिनं कूपकूर्मायमाणाः ।
त्रैलोक्यैकाधिनाथा इति विविधवचोविस्तरैर्निस्तपं चे-
त्संस्तूयन्ते स्तुवेऽहं कथमवितथमुर्वीतलार्धेश्वरीं ताम् ॥ ३ ॥
ब्रह्माण्डनाथेति वदेयमाहो चराचरस्येयमधीश्वरीति ।
किं वा परब्रह्मनियास्त्रिणीति विचक्षणेन्द्रा ननु शिक्षयध्वम् ॥ ४ ॥
सप्तद्वीपचतुःसमुद्रकलितां क्षोणीमयं रक्षती-
त्युक्तिः प्राक्तनकाव्यकारवचसां काष्ठा पराभूत्पुरा ।
अद्यानन्तमहान्तरीपमुदधिव्रातोज्ज्वलं भूतलं
शास्त्येषेति वचोऽपि वस्तुकथनं श्लाघा तु मोघा ततः ॥ ५ ॥
इत्यस्मत्कविवाक्यरीतिमपटुं संमन्यमाना वयं
संप्रत्याङ्गलमण्डलैकमहितालंकारतामीयुषः ।

---

१. लण्डनम्, London. जितरमा रमाधिककान्तिः ॥ २. यस्यै इति । 'स्पृहेरीप्सितः' (१।४।३६) इति चतुर्थी ॥ ३. किंराजानः कुत्सितनृपाः । 'किमः क्षेपे' (५।४।७२) इति समासान्तनिषेधः ॥ ४. परब्रह्मेति । तत्र सर्वान्तर्भावादिति भावः । पूर्वेण संबद्धोऽयं श्लोकः ॥ ५. वस्तुकथनं यथार्थवर्णनम् ॥ ६. इति पूर्वश्लोकोक्तरीत्या । आङ्गलमण्डलम्,

Digitized by Google

वाचोयुक्तिमनुत्तमां कवयितुः कस्यापि कृत्वा पुरो
राष्ट्रेऽस्या रविरस्तमेति न कदापीति ब्रवामादरात् ॥ ६ ॥
पृथ्वीन्द्रप्रवरैः पृथुप्रभृतिभिः प्रीत्या पुरा पोषिता
कालात्क्रूरतुरुष्कपाशवशगा यासीदथायासिता ।
सेयं नन्दति भारतीयजगतीलक्ष्मीरिमामाश्रिता
सारङ्गी मुनिवर्धितेव जननीं प्राप्ता तरक्षोर्मुखात् ॥ ७ ॥
एषा भूर्मिहिकामहीधरमहाम्भोराशिसंवेष्टिता
सा राज्ञी त्वटलाण्टिकाम्बुधिपरिक्षिप्तान्तरीपेश्वरी ।
केयं सा क्व पुनस्तथाप्यनुभवत्येनामसौ सांप्रतं
स्थाने हन्त चिरात्करोति नियतिर्ह्यभ्यर्हणामर्हताम् ॥ ८ ॥
यद्वा किं पुनरत्र चित्रमधिकं नैसर्गिकः खल्वयं
मार्गो यद्गुणशालिनो गुणिन एवासादयन्त्यन्ततः ।
कान्तारान्तरमाश्रिता ननु भुजङ्गालिङ्गिताप्युज्ज्वला
श्रीखण्डद्रुममञ्जरी मृगदृशां कर्णान्तमारोहति ॥ ९ ॥
पुष्कलदुष्कृतरभसान्निष्कारुण्यात्तुरुष्कधानुष्कात् ।
आच्छिद्य लालयन्त्या गामेनां किं वदामि सुकृतं ते ॥ १० ॥
अणिममहिममुख्या भूतयः किंच दूर-
श्रवणमथ विमानैर्यानमित्येवमादि ।
श्रुतचरमृषिवाक्ये सांप्रतं भारतीयाः
करबदरसदृक्षं भुञ्जतेऽस्याः प्रसादात् ॥ ११ ॥
चुल्लीफुल्लोत्कटोल्कीकृतगगनमहोल्काषट्कप्रपञ्चाः
प्रादेशोद्देशमात्रीकृतनगरसरित्सानुमत्काननौघाः ।

England. 'राष्ट्रेऽस्या रविरस्तमेति न कदापि,' The sun never sets in the British Empire. ७. तुरुष्कपाशाः, The wicked Turushkas. 'याप्ये पाशप्' (५।३।४७). ८. अटलाण्टिकाम्बुधि, The Atlantic Ocean. ९. अत्र पूर्वोक्तविषये । अन्ततः, At last. १०. गां भुवं धेनुं च । किं वदामि कथं वर्णयामि । गां इन्तुमुद्यतात्तामाच्छिद्य तत्परिपालनमत्यन्तपुण्याय हि ॥ ११. The microscope, the telescope and other curiosities of modern times are alluded to here. *Vimânas* are baloons.

Digitized by Google

आशामातङ्गतुङ्गीकृतकृशमशकश्रेणयो वासवेश्म-
प्रासादोपान्तवातायनवलभिनभोन्यस्तनक्षत्रकक्ष्याः ॥ १२ ॥
पाश्चात्याश्चित्रपात्रीकृतजनहृदया वागुराबद्धसाब्धि-
क्षोणीचक्रान्तराला विविधनवपरिष्कारवीचीविलासाः ।
यत्कारुण्येन नुन्ना जगदिदमखिलं क्षालयन्तः प्रथन्ते
तामेतां भारतीयाः कथमिव भुवनाधीश्वरीं विस्मरेयुः ॥१३॥ (युग्मकम्)
विद्युद्वाष्पप्रभृतिकमचैतन्यमप्यर्थजातं
सद्यः प्रोद्यत्प्रतिभहृदयैः प्राणिभिर्निर्विशेषम् ।
कृत्यं भृत्यप्रकरचिरनिर्वाह्यमादेशतस्ते
नित्यं कर्तुं प्रभवति बत त्वत्प्रभावोऽन्य एव ॥ १४ ॥
श्रीभारतप्रभृतिनिर्मितिदृष्टसारो
यो भारतीयजगतीप्रतिभाप्रभावः ।
आभाति सोऽद्य तमसो वदनादिवेन्दु-
र्लोभान्धपार्थिवकदर्थनतो विमुक्तः ॥ १५ ॥
सत्रैव किं विजयिलोहितवैजयन्त्या
विज्ञानसंपदुदभूदिह भारतेऽद्य ।
संध्यारुणारुणपुरःस्फुरितः प्रभाते
पूर्वेद्युरस्तमुपयात इवांशुमाली ॥ १६ ॥

१२-१३. चुल्ली, Hearth. उल्का, A brand. गगनमहोल्काः, Meteors. प्रादेशोद्देशः, Space measured by one span. The reference is to meteorology, the locomotive steam-engine, the microscope, the telescope and the electric telegraph respectively. पाश्चात्या विविधनवपरिष्कारवीचीविलासा यत्कारुण्येन नुन्ना इदं जगत् (भारतं) क्षालयन्तः प्रथन्ते, तामेतां भारतीयाः कथं विस्मरेयुरित्यन्वयः। वीचीरूपणात्क्षालयन्त इति ॥ १४. विद्युत्, Electricity. बाष्प, Steam. प्राणिभिर्निर्विशेषं प्राणिसमानम् । बतेत्याश्चर्ये ॥ १५. श्रीभारतं महाभारतम् । तमसो राहोः । This verse and the following one compare the modern times of enlightenment with the dark ages of Mahomedan supremacy. १६. सत्रा सह । लोहितवैजयन्ती, The red flag; the English standard. संध्यारुणारुणपुरःस्फुरितः संध्यालोहितेनानूरुणा पुरोभागे शोभितः । अरुणोऽत्र वैजयन्तीस्थानीयः ॥

Digitized by Google

किं वाचामिह विस्तरेण बहुना पिष्टं पुनः पिंषता
विश्वव्यापियशःप्रकाशमहिते विश्वंभराधीश्वरि ।
देशो भारतसंज्ञितो यदधुना यातो भवत्या वशं
सेयं हन्त पचेलिमास्य महतः पुण्यस्य सीमा ध्रुवम् ॥ १७ ॥
स्वातन्त्र्यमन्तरहितं प्रथमं वितीर्य
विश्वेभ्य एव विषयं निजमाश्रितेभ्यः ।
बध्नासि भक्तिमयशृङ्खलया पुनस्ता-
न्व्हिक्टोरियेश्वरि विचित्रतरा गतिस्ते ॥ १८ ॥
उर्व्यामौर्वपराक्रमापि लभते साम्राज्यगर्वश्रियं
गुर्वी सर्वपथीनसंमतगतिर्हौणी यदक्षौहिणी ।
एतद्भारतभूतलेश्वरि भवन्माहात्म्यलीलायितं
चैतन्ये चलिते क्रियासु कुशलाः किं पाणिपादादयः ॥ १९ ॥
दुर्नीतिः प्रथमं रुरुत्सितपुरान्निर्याति पश्चादरिः
शत्रुस्त्रीरुदितं पुरोऽथ नलिकोत्स्फोटध्वनिः श्रूयते ।
अग्रे संगरचत्वरं प्रविशति स्फीता जयश्रीस्ततः
सेनानींस्तव मार्ग एष विषमः सङ्गामकर्मण्यहो ॥ २० ॥
मध्येसिन्धु महामहीधरपरीणाहा भ्रमन्ती जवा-
त्स्वङ्गत्तुङ्गतरङ्गभङ्गनिनदैर्नीरन्ध्रयन्ती नभः ।
त्वत्साङ्गामिकयानपात्रपटली पाथोधिमूलोत्थितै-
र्लक्ष्मीकामुकमीनराजकुलजैः सोत्कण्ठमालोक्यते ॥ २१ ॥
यावत्प्रक्रमते प्रचण्डनिनदप्राग्भारघोरं रणे-
ष्वाग्नेयायुधवेधमिद्धरभसो योधाग्रणीस्तावकः ।

---

१७. पिष्टं पुनः पिंषता पिष्टपेषं कुर्वता । रुधादित्वात् श्नम् ॥ १८. भक्तिमयशृङ्खलया, By the bond of loyalty. १९. और्वी वाडवः । सर्वपथीना सर्वपथव्यापिनी ॥ २०. रुरुत्सिताद्रोद्धुमिष्टात् । नलिकोत्स्फोटः, Discharge of guns. पादत्रयमत्यन्तातिशयोक्त्यलंकृतम् ॥ २१. लक्ष्मीकामुकमीनराजकुलजैरादिमीनवंश्यैः । मीनैरिति शेषः ॥ तेषां स्वकुलकूटस्थस्मृतेरुत्कण्ठा । मत्स्यरूपविष्णुतुल्यानि यानपात्राणीति भावः ॥ २२. समुद्रस्य सेतुबन्धोद्यतरामचन्द्रस्मृतेरुन्मनस्कत्वादयः । प्रकृते आग्नेयायुधानि नलिकानि । विलासानामिति 'अधीगर्थ–' (२।३।५२) इति कर्मणि षष्ठी ॥

Digitized by Google

तावद्रावणवैरिणः शरविलासानां स्मरन्नुन्मनाः
प्रत्यङ्गप्रथमानवेपथुपृथुः पाथोनिधिर्वर्तते ॥ २२ ॥
दृष्टेषूग्ररणाजिरेषु रजसा रुद्धेषु वीर्याद्भुतं
वीराणां न विलोकितं निखिलमद्यालोकयामः सुखम् ।
इत्थं त्वत्कसमुद्रियाजिरभसं स्वर्गौकसां पश्यतां
धूमैर्व्योम सुचूर्णपूर्णनलिकोद्गीर्णैर्बतोर्णूयते ॥ २३ ॥
कल्पान्तोद्भटकंकटीकविकटव्यात्तोग्रवक्त्रोद्गल-
त्क्ष्वेलाजालकरालकालनलिकोद्गीर्णोच्चढांढांध्वनिः ।
झंझामारुतझांकृतेन गुणितः स्फीतेन जन्येषु ते
दिग्दन्तावलकर्णजाहकुहराण्यापूर्णयन्घूर्णते ॥ २४ ॥
वाचालोच्चालिवीचीनिचयविकचितो दत्तहस्तावलम्बः
सैन्यक्ष्वेलानिनादैस्तव नलिकघटोत्स्फोटजस्फाररावः ।
संभ्रान्ताम्भोधिकन्यासरभसनिबिडाश्लेषदानान्मुरारे-
र्निद्राविद्रावणागः स्वकृतमतिजवादेव देवि भ्रमार्दिष्ट ॥ २५ ॥
वनमेव गतिस्तवाहितानां समरं प्राप्तवतां जले स्थले वा ।
प्रथमे श्रमतो विना लभन्ते चरमे दूरपलायनेन दूनाः ॥ २६ ॥
सकलाः कला दधाना सहजश्रीः शुभ्रकीर्तिकौमुद्याः ।
विष्वद्रीचीर्वीचीः सूरिचकोरान्सुराज्ञि पाययसि ॥ २७ ॥
संगीतं किमु वर्णयाम्यसि यतः षड्जाश्रियालिङ्गिता
शश्वद्रक्तनरर्षभश्रितपदा गान्धारयन्ती सदा ।

---

२३. सुखं परागविरहादिति भावः । समुद्रियाजिः समुद्रभवं युद्धम् ॥ 'समुद्राभ्राद्धः' (४।४।११८) । ऊर्णूयते आच्छाद्यते ॥ २४. कंकटीको रुद्रः । कर्णजाहं कर्णमूलम् । 'तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ ॥' आपूर्णयन्नापूर्णानि कुर्वन् ॥ २५. विकचितो विकासितः । निद्राभञ्जकोऽपि तुमुलारवो हरेर्लक्ष्मीहटाश्लेषलाभहेतुरिति सुखमृष्यो भवतीति भावः ॥ २६. लभन्त इति । वनमित्यनुषज्यते । एकत्र वनं जलम्, अन्यत्र काननम् ॥ २७. सहजश्रीः सहजराज्यलक्ष्मीः, रमासहोदरी च । विष्वद्रीचीः समन्ताद्व्याप्तिनीः । 'विष्वग्देवयोश्च टेरद्रयञ्चतावप्रत्यये' (६।३।९२). २८. संगीतमित्यादि । राज्ञीपक्षे षड्जया संधिविग्रहादिगुणषट्कोत्थया श्रिया आलिङ्गिता । शश्वद्रक्तैर्नरर्षभैः नृपैः श्रितपदा । गां भुवं धारयन्ती बिभ्रती । सुमध्यमाकुलमणिः स्त्रीरत्न-

Digitized by Google

किंचोद्भासि सुमध्यमाकुलमणिः सत्पञ्चमालापिनी
श्रीमद्राज्ञि सुधैवतेऽमलवचोगुम्भे निषादिन्यहो ॥ २८ ॥
शिरीषश्रीचोरः प्रकृतिसुकुमारस्तव करः
करीषाग्निप्रायं महदिह महस्तत्पुनरिदम् ।
तथापि प्रत्यक्षा नियतमनयोर्जन्यजनक-
प्रथा लोके बीजाङ्कवति हि मृदोः कर्कशतरुः ॥ २९ ॥
बाहुः स्वभावललितस्तव कङ्कणेना-
प्युद्वेजितो यदि न विश्वसृजा व्यधायि ।
चिन्तामणिप्रसृतरेणुमयाणुपुञ्जै-
र्भूभारमुच्छ्रितमिमं बिभृयात्कथं सः ॥ ३० ॥
सद्वृत्तानपि मानवान्निजहितं पन्थानमुन्मुञ्चतो
भूपालाः किल मारयन्ति वितथान्प्रख्याप्य मन्तून्बहून् ।
त्वं तु क्षान्तवती प्रशान्तहृदया मन्तुं महान्तं न किं
स्वप्राणक्षपणोद्यते स्थितिकृते दण्डेऽपि दुष्टात्मनि ॥ ३१ ॥
मङ्गलसर्वस्वमयीमङ्गलसच्चक्रवर्तिलक्ष्मीकाम् ।
आङ्गलसङ्गाग्यझरीमङ्ग ललाम क्षितेर्भजत ॥ ३२ ॥

भूता । सत्पञ्चमालापिनी कोकिलस्वरा त्वमुद्भासि ॥ ते अमलवचोगुम्भे सुधैव निषादिनी । अमृतोपमवाणी भवसि ॥ स्वरपक्षे षड्जश्रिया षड्जाख्यस्वरकान्त्या । शश्वद्रक्तनरा ऋषभश्रितपदा । गान्धारयन्ती गान्धारमाचक्षाणा । 'तत्करोति तदाचष्टे' इति णिजन्ताच्छतृप्रत्ययः । उद्भासि सुमध्यमा मध्यमाख्यस्वरशोभिनी चासि ॥ सुधैवते निषादिनि निषादसहिते इत्यादिसंबुद्धयः ॥ अहो एवं स्वरमय्यास्तव संगीतं कथं वर्ण्यत इत्याश्चर्यम् ॥ २९. तदिदं महः तत्तादृशः प्रतापः । लोक इत्यादिर्दृष्टान्तः ॥ ३०. चिन्तामणीत्यादि । मणिमन्त्रौषधीनां हि दुरूहः प्रभावः । औदार्यभूभारवहनादिकमत्र साध्यम् ॥ ३१. दुष्टात्मनि, One John Francis attempted to shoot at the Queen while Her Majesty was driving down Constitution Hill. But happily the wretch failed in his attempt. Her Majesty magnanimously changed his sentence of death to that of transportation for life. This took place in May, 1842. (*Vide* Barnett's Life of Queen Victoria P. 177.) ३२. अङ्गेषु लसन्ती चक्रवर्तिलक्ष्मीर्यस्याः । उरःप्रभृतित्वान्नित्यः कप् । आङ्गलसत्तामाङ्गलद्वीपवासिनां भाग्यझरीम् । क्षितेर्ललाम भूषणभूताम् । अङ्गेति जनात्प्रति संबोधनम् ॥

Digitized by Google

बिरुदावलिलाभमोदमानाः पुरुदामोदरदारसेव्यमानाः ।
अवनीभरभाजि बाहुदण्डे तव नीवृन्निलया भवन्ति सन्तः ॥ ३३ ॥

अलभत शतकोटिमेकमिन्द्रो मुनिवधकल्मषदूषितः स मन्दः ।
वितरसि शतकोटिमाश्रितानां शतश इह त्वमसीमपुण्यभूमा ॥ ३४ ॥

कीर्तिं ते कमलोदरोत्कटरुचिं लोके भ्रमन्तीं सदा
स्वर्गङ्गापुलिनेषु केलिरसिकां शंसन्ति हंसीं जनाः ।
किं त्वेषा बहिरेति निर्मलतरात्सन्मानसादुत्पत-
द्विन्दुश्रेणिषु भूरिवर्षसमयेष्वत्यच्छवर्णाकृतिः ॥ ३५ ॥

भवत्प्रतापं विजिगीषमाणो भीष्मोष्मलो भीमनिटालशुष्मा ।
अद्यापि विद्योतिनमुत्तमाङ्गे बिभर्ति भङ्गागतमर्धचन्द्रम् ॥ ३६ ॥

सतीव्रतेऽतीव सतीव्रता सती समन्ततोऽनन्तकुकान्तसंततेः ।
उदग्ररागोग्रकरग्रहे सदा प्रतोतुषीषीति नितान्तमद्भुतम् ॥ ३७ ॥

नेत्रासेचनकं जनस्य जनयन्मित्राक्षिकौतूहलं
मात्रायोजितयौवराज्यसुषमाचित्रातिरम्याकृतिः ।
सत्राणैकपरायणो विजयते सुत्रामसूनोः समः
पुत्राणामयमुत्तमोऽप्यचरमो वित्रासितारिस्तव ॥ ३८ ॥

---

३३. बिरुद, Titles of honour. पुरुदामोदरदारसेव्यमानाः प्रचुरलक्ष्मीसंपन्नाः । तव बाहुदण्डे अवनीभरभाजि त्वयि राज्यं रक्षन्त्याम् । नीवृज्जनपदम् । ३४. शतकोटिं वज्रम् । मुनिर्दधीचिः । तत्कथा पुराणेषु द्रष्टव्या । शतकोटिं वितरसि तत्संख्याकं धनं ददासि ॥ ३५. कीर्तिपक्षे रुचिः कान्तिः । अन्यत्राभिरुचिः । एषा उत्पतद्बिन्दुश्रेणिषु उत्पतन्त्यो हर्षान्माद्यन्त्यो बिन्दुश्रेणयो विद्वत्समूहा येषु तेषु भूरिवर्षसमयेषु स्वर्णवृष्टिकालेषु सन्मानसान्सतां हृदयादत्यच्छवर्णाकृतिरतिनिर्मलाश्चाकृतिः सती बहिरेति । विद्वद्वर्गो धनं ददत्यास्ते कीर्तिं सन्तो गायन्तीति भावः ॥ हंसीपक्षे अत्यच्छवर्णाकृतिरतिश्वेतवर्णा एषा इत्यादि सुगमम् ॥ ३६. भीमनिटालशुष्मा शंकरनिटिलाग्निः । भङ्गागतं पराजयलब्धम् । अर्धचन्द्रं चन्द्रखण्डम्, गलहस्तं च । फालानलोपरिदृश्यमानोऽर्धचन्द्रः । पराजयचिह्नत्वेनोत्प्रेक्ष्यते ॥ ३७. सतीव्रता तीव्रत्वसहिता कुकान्ता राजानः, कुत्सितवल्लभाश्च । संततेरित्येकत्र पञ्चमी, अन्यत्र षष्ठी । रागः प्रभुविषयिका रतिः, स्त्रीविषयिका च । करग्रहो भागधेयस्वीकारः पाणिग्रहणं च । प्रतोतुषीषि । यङ्लुगन्ताल्लट् । ३८. 'तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात्' । मात्रा श्रीव्हिक्टोरियया त्वया । सत्राणं सतां रक्षणम् । उत्तमोऽन्तिमोऽप्यचरमः प्रथम इति विरोधः । श्रेष्ठः प्रथमश्चेति परिहारः ॥

Digitized by Google

अत्यच्छैः पिच्छगुच्छैः शिरसि जननुतैर्लाञ्छितो धर्मजात-
ध्रुक्षु प्रोत्क्षिप्तकौक्षेयकमहितकरः ख्यातसत्यानुरोधः ।
वन्द्यानन्दप्रदाता विजयधृतरतिर्मानिताभीरवामः
पुत्रो देवश्च दद्यात्स तव नवनवां नित्यमानन्दलक्ष्मीम् ॥ ३९ ॥

आचन्द्रतारमचलेश्वररामसेतु-
पर्यन्तपातिनमिमं परिपालयन्ती ।
देशं यशोविशदिताष्टदिशावकाशा
व्हिक्टोरिया विजयतां जगतां हिताय ॥ ४० ॥

स्वस्वप्रोद्दामभक्तिप्रकटनकलितोद्योगतत्तद्धरित्री-
वृत्रारातिप्रधानप्रविहितविविधारम्भसंभाव्यमानः ।
वित्तो व्हिक्टोरियायाः सुचिरपरिभृतप्राज्यसाम्राज्यलक्ष्मी-
पञ्चाशद्वत्सरापूरणमहितमहः सांप्रतं जृम्भतेऽयम् ॥ ४१ ॥

संमोदाम्बुधिवीचिजालवलनोपायं जनान्दर्शय-
न्संपत्सद्विनियोगकौशलकलां भूमीभृतः शिक्षयन् ।
साम्राज्यप्रथमानसंपदुदधेर्गाम्भीर्यमुद्घाटय-
न्संप्रत्यत्र चकास्ति वित्तविभवो व्हैक्टोरियोऽयं महः ॥ ४२ ॥

ब्रह्मानन्दस्य खण्डः क्षितितलजनुषां संपदां मानभाण्डः
साम्राज्यस्य प्रकर्षः प्रभुजनविषयप्रेमपूरस्य वर्षः ।
संसारस्यैकसारः सकलजनिजुषामुत्सवस्यावतारः
कोऽप्यद्याप्यायमानः प्रमदयति जनान्हूणराज्ञीनिदानः ॥ ४३ ॥

---

३९. पिच्छ, Feathers (1) of the ostrich, (2) of the peacock. धर्मजातं युधिष्ठिरं धर्मसमूहं च द्रुह्यन्तीति तद्द्रुहस्तेषु । सत्यस्य सत्यभामायाश्च । वन्द्यानां वन्दिनां च । विजयोऽर्जुनः, जयश्च । मानिताभीरवामः संभावितघोषस्त्रीकः । मानिता अभीर्भया-भावो धैर्यं यस्य । अवामोऽकुटिलः । ऋजुबुद्धिरिति यावत् । स पुत्रः, H. R. H. the Prince of Wales. स देव श्रीशौरिः ॥ ४०. अचलेश्वरो हिमालयः ॥ ४१. सुचिर &c. The Jubilee. ४२. वित्तवैभवः ख्यातसंपत् । व्हैक्टोरियो व्हिक्टोरियासंबन्धी । 'तस्येदम्' इत्यण् ॥ ४३. आप्यायमानस्तृप्तिं जनयन् । अन्तर्भावितणिजर्थात्प्यायतेः शानच् । कोऽपि । अर्थादुत्सवः ॥

Digitized by Google

आसेतोरनुपदमा तुषारशैला-
देशेऽस्मिन्नवकिरदुत्सवस्य कन्दान् ।
पञ्चाशत्तममिह हूणराज्यलक्ष्मी-
जन्मर्क्षं जनयति कस्य न प्रहर्षम् ॥ ४४ ॥

अपि दूरनिविष्टमप्यणीयो महसालिङ्गितमाङ्गलान्तरीपम् ।
परितः किरणानिवांशुमाली किरति स्फारमहोत्सवप्ररोहान् ॥ ४५ ॥

यावत्काकः पिकानां प्रभवति पठितुं पञ्चमालापशैलीं
यावत्कारस्करश्च प्रकटयितुमलं माधुरीं माकरन्दीम् ।
तूलीसज्जाङ्गुलीका महमिममखिलं तावदुद्रिक्तसूक्तै-
र्वक्तुं व्हिक्टोरियाया वयमपि कविताचातुरीं दर्शयेम ॥ ४६ ॥

वाचालं तदिति विदन्तमप्यहो मां
वाचालं कलयति कौतुकातिरेकः ।
माण्डूकीमपि युवमण्डलीं घनर्तु-
र्मायूरीमिव मुखरीचरीकरीति ॥ ४७ ॥

लोकालोकस्य सानुष्वपरतटगतेष्वन्धकारान्धता चे-
दुर्भिक्षं दुस्थितेश्चेन्महइह महिते हन्त व्हिक्टोरियायाः ।
आलस्यं चेदसात्म्याशनरभसजुषां वृद्धकुक्षिंभरीणां
रम्भास्तम्भेषु बन्धो यदि भुवनतले केवलं दृश्यतेऽद्य ॥ ४८ ॥

श्रीशौरेर्नावतारो यदि जनरहिते बन्धगेहेऽभविष्य-
त्स्पष्टश्चेन्नाभविष्यन्नरकजयमहो निग्रहामङ्गलेन ।

---

४४. जन्मर्क्षमित्युपचारात् । जन्मदिनमित्यर्थः । राज्यलक्ष्मीति । अर्थात्प्रकृतव्हिक्टोरियासंबन्धिन्याः ॥ ४५. महसा चक्रवर्तितेजसा ॥ ४६. कारस्करो वृक्षविशेषः । माकरन्दीं मकरन्दसंबन्धिनीम् । तूलीसज्जाङ्गुलीकाः काव्यनिर्माणसंनद्धाः ॥ ४७. तत्पूर्वश्लोकोक्तहेतोः । माण्डूकीं मण्डूकसंबन्धिनीम् । एवमेव मायूरीमिति । घनर्तुः प्रावृट् । मुखरीचरीकरीति भृशं मुखरां शब्दायमानां करोति । मुखरीति च्व्यन्तम् । चरीकरीतीति कृञो यङ्लुक् ॥ ४८. अपरतटं पश्चिमसानुः । इह महेऽस्मिन्नुत्सवे । अन्धकारान्धता भुवनतलेऽस्ति चेत्स लोकालोकस्यापरतटगतेषु सानुषु केवलं दृश्यत इत्यन्वयः । एवमुत्तरत्रापि । ४९. अलप्स्यामहीति लभेः क्रियातिपत्तौ लङ् ॥

Digitized by Google

दम्भादुज्जृम्भमाणाद्यादि बलिविजयः संभवं नागमिष्य-
त्कान्यप्यस्याप्यलप्स्यामहि महितमहस्योपमानानि नूनम् ॥ ४९॥

प्रक्रान्तेऽस्मिन्नुत्सवे कुत्र कुत्र
प्रेक्ष्यन्ते न द्वारदेशे गृहाणाम् ।
नानाकारा नैकवर्णप्रकारा
युक्त्युन्मेषा युष्मदाशीर्विशेषाः ॥ ९० ॥

अस्माभिस्तु समस्तमङ्गलजुषां युष्माकमेकां नवा-
माशास्ति वितरीतुमक्षमतमैर्वैलक्ष्यवाचंयमैः ।
आशीराशिरशेष एष फलिनो दिष्ट्या कृषीष्ट क्षणा-
दुद्दिष्टं तव देवि तत्तदखिलं कल्याणमित्यर्थ्यते ॥ ९१ ॥

इति राजराजवर्मनिर्मिता पञ्चाशत्पूर्तिपञ्चाशिका संपूर्णा ।

---

५०. युक्तयुन्मेषा इति । तद्रूपा इत्यर्थः । युक्तेरुन्मेषो येष्विति व्यधिकरणबहुव्रीहिर्वा ।
५१. अस्माभिरिति । तुः पूर्वोक्ताशीःप्रयोक्तृभ्यो भेदं द्योतयति । एष पूर्वश्लोकोक्तः । कृषी-
ष्टेति कृञ आशिषि लिङ् ॥

Digitized by Google

शुद्धिपत्रम्.

आद्यकाव्ये

पृष्ठे.	पङ्क्तौ.	अशुद्धम्.	शुद्धम्.
६	१२	स्य	स्स
१२	२	न्म	न्मं
१६	१०	तः	त
२१	१८	नृप	पति
,,	२३	स्ता वि	स्ताव
२५	८	णौ च	णौच
२७	१२	मं	दं

द्वितीयकाव्ये

५	२६	जः का	जःका
६	१	य	यं
,,	२७	स्यशि	स्यसि
७	१५	घ्र	घ
,,	२४	,,	,,
९	१	जःशौ	जः शौ
११	५	श्वि	श्रि

तृतीयकाव्ये

२	८	टलाण्टि	तलान्ति
,,	२५	,,	,,
५	२४	ट	ठ
६	२०	सि सु	सिसु
,,	२९	त्ता	ता
,,	३०	त्र	न्र
७	१८	दम्	दः
,,	२५	: ।	:
,,	२२	न्स	त्स

सर्वत्र 'व्हिक्टोरिया' इत्यस्य स्थाने 'विक्तोरिया' इति.

Digitized by Google